**पद्म** *a.* [पद्-मन्] Lotus-hued. -**द्मम्** 1 A lotus (*m.* also in this sense); Nelumbium Speciosum (variety red); पद्मपत्रस्थितं तोयं धत्ते मुक्ताफलश्रियम्. -2 A lotus-like ornament. -3 The form or figure of a lotus. -4 The root of a lotus. -5 The coloured marks on the trunk and face of an elephant; कालः किरातः स्फुटपद्मकस्य वधं व्यधाद्यस्य दिनाद्विपस्य N. 22. 9; -6 An army arrayed in the form of a lotus; पद्मेन चैव व्यूहेन निविशेत सदा स्वयम् Ms. 7. 188. -7 A particular high number (one thousand billions). -8 Lead. -9 N. given by the Tāntrikas to the six divisions of the upper part of the body called *Chakras*. -10 A mark or mole on the human body. -11 A spot. -12 N. of a particular part of a column. -**द्मः** A kind of temple. -2 N. of a quarter-elephant. ये पद्मकल्पैरपि च द्विपेन्द्रैः Bu. Ch. 2. 3. -3 A species of serpent. -4 An epithet of Rāma. -5 One of the nine treasures of Kubera; see नवनिधि. -6 A kind of coitus or mode of sexual enjoyment. -7 A particular posture of the body in religious meditation. -8 One of the eight treasures connected with the magical art called पद्मिनी. -**द्मा** 1 N. of Lakṣmī, the goddess of fortune, and wife of Viṣṇu; (तं) पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् R. 4. 5. -2 Cloves. -**Comp.** -**अक्ष** *a.* lotus-eyed; रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम् Rāmarakṣā 25. (-**क्षः**) an epithet of Viṣṇu or the sun; (-**क्षम्**) the seed of a lotus. -**अटः** Cassia Tora (Mar. टाकळा). -**अन्तरम्**, -**रः** a lotus-leaf. -**आकरः** 1 a large tank or pond abounding in lotuses. -2 a pond or pool or water in general. -3 a lotus-pool. -4 an assemblage of lotuses; पद्माकरं दिनकरो विकचीकरोति Bh. 2. 73. -**आलयः** an epithet of Brahman, the creator. (-**या**) 1 an epithet of Lakṣmī. -2 cloves. -**आसनम्** 1 a lotus-seat; प्रणेमतुस्तौ पितरौ प्रजानां पद्मासनस्थाय पितामहाय Ku. 7. 86. -2 a particular posture in religious meditation; ऊरुमूले वामपादं पुनस्तु दक्षिणं पदम्। वामोरौ स्थापयित्वा तु पद्मासनमिति स्मृतम्॥; ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थम् Rāmarasā 1. -3 a kind of coitus. (-**नः**) 1 an epithet of Brahman, the creator. -2 of Śiva. -3 of the sun. -**आह्वम्** cloves. -**उद्भवः** an epithet of Brahman. -**कर**, -**हस्त** *a.* holding a lotus. (-**रः**, -**स्तः**) 1 an epithet of Viṣṇu. -2 a lotus like hand. -3 N. of the sun. (-**रा**, -**स्ता**) N. of Lakṣmī. -**कर्णिका** 1 the pericarp of a lotus. -2 the central part of an army arrayed in the form of a lotus. -**कलिका** a lotus-bud, an unblown lotus. -**काष्ठम्** a fragrant wood used in medicine. -**केशरः**, -**रम्** the filament of a lotus. -**कोशः**, -**कोषः** 1 the calyx of a lotus. -2 a position of the fingers resembling the calyx of a lotus. -**खण्डम्**, -**षण्डम्** a multitude of lotuses. -**गन्ध**, -**गन्धि** *a.* lotus-scented, or as fragrant as or smelling like a lotus. (-**न्धम्**, -**गन्धि** *n.*) = पद्मकाष्ठ q. v. -**गर्भः** 1 an epithet of Brahman. -2 of Viṣṇu. -3 of Śiva. -4 of Buddha. -5 the sun. -6 the inside or middle of a lotus; पद्मगर्भादिवोद्धृतम् Kāv. 2. 41. -**गुणा**, -**गृहा** 1 an epithet of Lakṣmī, the goddess of wealth. -2 cloves. -**जः**, -**जातः**, -**भवः**, -**भूः**, -**योनिः**, -**संभवः** epithets of Brahman, the lotus-born god. -**तन्तुः** the fibrous stalk of a lotus. -**नाभः**, -**भिः** an epithet of Viṣṇu; शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम्. -**नाभः** 1 N. of the eleventh month (reckoned from मार्गशीर्ष). -2 a magical formula spoken over weapons. -**नालम्** a lotus-stalk. -**निधिः** a treasure of the value of a *Padma*. -**पाणिः** 1 an epithet of Brahman. -2 N. of Buddha. -3 N. of the sun. -4 of Viṣṇu. -**पुष्पः** the Karṇikāra plant. -**प्रिया** the goddess Manasā, the wife of sage Jaratkāru. -**बन्धः** a kind of artificial composition in which the words are arranged in the form of a lotus-flower; see K. P. 9 *ad. loc.* -**बन्धुः** 1 the sun. -2 a bee. -**बीजम्** the seed of a lotus. -**भासः** an epithet of Śiva. -**मालिनी** the goddess of wealth. -**मुद्रा** (-**द्रिका**) a particular pose according to Tantraśāstra; हस्तौ तु संमुखौ कृत्वा तदधः प्रोथिताङ्गुली। तलान्तर्मिलिताङ्गुष्ठौ कृत्वैषा पद्ममुद्रिका॥ Tantrasāra. -**रागः**, -**गम्** a ruby; R. 13. 53; 17. 23; Ku. 3. 53; Kau. A 2. 11. 29; आकरे पद्मरागाणां जन्म काचमणेः कुतः॥ H. -**रूपा** an epithet of the goddess of wealth. -**रेखा** a figure on the palm of the hand (of the form of a lotus-flower) which indicates the acquisition of great wealth. -**लाञ्छनः** 1 an epithet of Brahman. -2 Kubera. -3 the sun. -4 a king. (-**ना**) 1 an epithet of Lakṣmī, the goddess of wealth. -2 or of Sarasvatī, the goddess of learning. -3 N. of Tārā. -**वनबान्धवः** the sun. -**वर्चस्** *a.* lotus-hued. -**वासा** an epithet of Lakṣmī. -**समासनः** an epithet of Brahman. -**स्नुषा** 1 an epithet of Gaṅgā. -2 of Lakṣmī. -3 of Durgā. -**हस्तः** a particular measure of length. -**हासः** an epithet of Viṣṇu.

**पद्मकम्** 1 An army arrayed in the form of a lotus-flower. -2 The coloured spots on the trunk and face of an elephant. -3 A particular posture in sitting. -4 A kind of wood (of Cerasus Puddum); Rām. 2. 76. 16; Mb. 4. -5 N. of a particular constellation.

**पद्मकिन्** *m.* 1 An elephant. -2 The *Bhūrja* or birch tree.

**पद्मशः** *ind.* By thousands of billions.

**पद्मावती** 1 An epithet of Lakṣmī. -2 N. of a river; Māl. 9. 1. -3 The goddess Manasā.

**पद्मिन्** *a.* [पद्म-इनि] 1 Possessing lotuses. -2 Spotted; शतं गजानामपि पद्मिनां तथा Mb. 1. 198. 16. -*m.* 1 An elephant; पद्मीशनाथैः परिशीलनीया लक्ष्मीव संभाति नरेन्द्र ते सभा Sūkti. 5. 30. -2 An epithet of Viṣṇu.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पद्मिनी** 1 The lotus plant; पद्मिनी नक्तमुन्निद्रा Kāv. 4. 45; सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नाम् Ku. 3. 76; R. 16. 68; Me. 83; M. 2. 13; निरास भृङ्गं कुपितेव पद्मिनी Bk. 2. 6. -2 An assemblage of lotus flowers. -3 A pond or lake abounding in lotuses; पुष्पैश्चान्यैः परिक्षिप्तं पद्मिन्या च सपद्मया Rām. 3. 1. 6; क्षीणतोयानिलार्काभ्यां हतत्विडिव पद्मिनी। बभूव पाण्डवी सेना तव पुत्रस्य तेजसा॥ Mb. 7. 153. 20. -4 The fibrous stalk of a lotus. -5 A female elephant. -6 A woman of the first of the four classes into which writers on erotical science divide women; the रतिमञ्जरी thus defines her:—भवति कमलनेत्रा नासिकाक्षुद्ररन्ध्रा अविरलकुचयुग्मा चारुकेशी कृशाङ्गी। मृदुवचनसुशीला गीतवाद्यानुरक्ता सकलतनुसुवेशा पद्मिनी पद्मगन्धा॥ -Comp. -ईशः, -कान्तः, -वल्लभः the sun. -कण्टकः a. kind of leprosy. -खण्डम्, -षण्डम् a multitude of lotuses; a place abounding in lotuses.

**पद्मेशयः** An epithet of Viṣṇu.

**पद्य** *a.* 1 Consisting of Padas or lines. -2 Measuring a *pada*. -3 Belonging to the foot; श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसन् शवो यस्तु न वेद गन्धम् Bhāg. 2. 3. 23. -4 Marked with footsteps. -5 Belonging to a word. -6 Final. -द्यः 1 A Śūdra. -2 A part of a word. -द्या 1 A footpath, path, way. -2 Sugar. -द्यम् 1 A stanza or verse (consisting of four lines); मदीयपद्यरत्नानां मञ्जूषैषा मया कृता Bv. 4. 45; पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा Chand. M. 2. -2 Praise, panegyric (स्तुति).

**पद्रः** 1 A village. -2 A village road. -3 The earth. -4 N. of a district.

**पद्वः, -द्वम्** 1 The world of human beings (भूलोक). -2 A car. -3 A road; (also पद्वन् in this sense). -4 The earth.

**पन्** 1 U. (पनायति-ते, पनायित or पनित) 1 To praise, extol; cf. पण्. -2 (Ātm.) To rejoice at, be glad of.

**पनस्यति** Den. P. To be admirable.

**पनस्यु** *a.* Showing one's self worthy of admiration; glorious.

**पनायित, -पनित** *a.* Praised.

**पनुः** (-नूः) Ved. Admiration, praise.

**पनसः** 1 The bread-fruit or jack tree. -2 A thorn. -सा, -सी 1 A kind of malady, pustular and phlegmonoid inflammation of the skin or external organs. -2 A female monkey. -3 A female demon. -सम् The fruit of the bread-fruit tree.

**पनसिका** Pustules on the ears and neck.

**पन्थ्** 1, 10 P. To go, to travel.

**पन्थक** *a.* Produced in or on the way.

**पन्न, पन्नग** See under पद्.

**पपिः** The moon.

**पपी** *m.* [cf. Uṇ 3. 159] 1 The sun. -2 The moon.

**पपु** *a.* Fostering, protecting. -पुः *f.* A foster-mother.

**पम्पा** 1 N. of a lake in the Daṇḍakā forest; इदं च पम्पाभिधानं सरः U. 1; R. 13. 30; Bk. 6. 73. -2 N. of a river in the south of India.

**पय्** 1 Ā. (पयते) To go, move.

**पयस्** *n.* 1 Water; Bhāg. 8. 2. 4; पयसा कमलं कमलेन पयः पयसा कमलेन विभाति सरः. -2 Milk; पयःपानं भुजङ्गानां केवलं विषवर्धनम् H. 3. 4; R. 2. 36, 63; 14, 78 (where both senses are intended). -3 Semen virile. -4 Food. -5 Ved. Night. -6 Vital spirit, power, strength (Ved). (पयस् is changed to पयो before soft consonants). -Comp. -गलः, -डः 1 hail. -2 an island. -घनम् hail. -चयः (पयश्चयः) a reservoir or lake. -जम् a lotus; पातामेतौ पयोजोदरललिततलौ पङ्कजाक्षस्य पादौ। विष्णुपादादि स्तोत्रम् 12. °योनिः (same as पद्मयोनि = Brahmadeva); पयोजयोनिः प्रणिधाय मानसं व्यधत्त यस्यामरविन्दलोचनः Sahendra 3. 37. -जन्मन् *m.* a cloud. -दः a cloud; Me. 7; मत्तः सदाचारशुचेः कलङ्कः पयोदवातादिव दर्पणस्य R. 14. 37. °सुहृद् *m.* a peacock. -धरः 1 a cloud; पयोधरघनीभावस्तावदम्बरसंभ्रमः। आश्लेषोपगमस्तत्र यावन्नैव प्रवर्तते॥ Subh. Ratn. (this refers both to a cloud and a woman's breast). -2 a woman's breast; पद्मापयोधरतटी Gīt. 1; विपाण्डुभिर्म्लानतया पयोधरैः Ki. 4. 24. (where the word means 'a cloud' also); R. 14. 22. -3 an udder; पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम् R. 2. 3. -4 the cocoa-nut tree. -5 the backbone or spine (कशेरुक). -धस् *m.* 1 the ocean. -2 a pond, lake, a piece of water. -3 a rain-cloud. -धारागृहम् a bath-room with flowing water. -धिः, -निधिः the ocean; प्रयान्ति नद्यस्त्वरितं पयोनिधिम् Rs. 2. 7; N. 4. 50. -पूरः a pool, lake. -भृत् *m.*, -मुच् *m.* a cloud; यदि नासारभृतः पयोभृतः Śi. 16. 61; करीव सिक्तं पृषतैः पयोमुचाम् R. 3. 3; 6. 5. -मानुषी a water-nymph. -रयः the current of a river. -राशिः the ocean. -वाहः a cloud; प्रावृषेण्यं पयोवाहं विद्युदैरावताविव R. 1. 36. -व्रतः, -व्रतम् subsisting on mere milk (as a vow); दिनमेकं पयोव्रतः Ms. 11. 144. cf. अदितिपयोव्रतम् Bhāg. 8. 16.

**पयस्य** *a.* 1 Milky, made of milk. -2 Watery. -स्यः A cat. -स्या Curds.

**पयस्यति, पयायते** Den. P. To flow, to act like milk; कामं मदीक्षामयकामधेनोः पयायतामभ्युदयस्त्वदीयः N. 14. 79.

**पयस्वल** *a.* Rich in milk, yielding copious milk. -लः A goat.

**पयस्विन्** *a.* Milky, juicy. -नी 1 A milch-cow; प्रदक्षिणीकृत्य पयस्विनीं ताम् R. 2. 21; 54, 65. -2 A river. -3 A she-goat. -4 Night.

**पयोधिकम्** The cuttle-fish bone.

**पयोरः** The Khadira tree.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पयोष्णी** N. of a river rising in the Vindhya mountain (identified by some with the modern Tāptī river, but more correctly with Purṇā, a feeder of that river). **–Comp. –जाता** (पयोष्णी जाता यस्याः सा) an epithet of the river Sarasvatī.

**पर** *a.* [पृ–भावे–अप्, कर्तरि अच् –वा] (Declined optionally like a pronoun in nom. voc. pl., and abl. and loc. sing. when it denotes relative position) **1** Other, different, another; see पर *m* also. **–2** Distant, removed, remote; अपरं भवतो जन्म परं जन्म विवस्वतः Bg. 4. 4. **–3** Beyond, further, on the other side of; म्लेच्छदेशस्ततः परः Ms. 2. 23; 7 158. **–4** Subsequent, following, next to, future, after (usually with abl.); बाल्यात् परामिव दशां मदनोऽध्युवास R. 5. 63; Ku. 1. 31. **–5** Higher, superior; सिकतात्वादपि परां प्रपेदे परमाणुताम् R. 15. 22; इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः। मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥ Bg. 3. 42. **–6** Highest, greatest, most distinguished, pre-eminent, chief, best, principal; क्षत्रात् परं नास्ति Bri. Up. 1. 4. 11. न त्वया द्रष्टव्यानां परं दृष्टम् Ś. 2; Ki. 5. 18; परतोऽपि परः Ku. 2. 14 'higher than the highest'; 6. 19; Ś. 7. 27. **–7** Having as a following letter or sound, followed by (in comp.). **–8** Alien, estranged, stranger. **–9** Hostile, inimical, adverse, **–10** Exceeding, having a surplus or remainder, left over; as in परं शतम् 'exceeding or more than a hundred. **–11** Final, last. **–12** (At the end of comp.) Having anything as the highest object, absorbed or engrossed in, intent on, solely devoted to, wholly engaged or occupied in; परिचर्यापरः R. 1. 91; so ध्यानपर, शोकपर, दैवपर, चिन्तापर &c. **–रः 1** Another person, a stranger, foreigner; oft. in pl. in this sense; यतः परेषां गुणग्रहीतासि Bv. 1. 9; Śi. 20. 74; see एक, अन्य also. **–2** A foe, an enemy, adversary; उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता Śi. 2. 10; Pt. 2. 158; R. 3. 21. **–3** The Almighty; तावदध्यासते लोकं परस्य परचिन्तकाः Bhāg. 3. 32. 8. **–रम् 1** The highest point or pitch, culminating point. **–2** The Supreme Spirit; तेषामादित्यवज्ज्ञानं प्रकाशयति तत् परम् Bg. 5. 16. **–3** Final beatitude; असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः Bg. 3. 19. **–4** The secondary meaning of a word. **–5** (In logic) One of the two kinds of सामान्य or generality of notion; more extensive kind, (comprehending more objects); *e. g.* पृथ्वी is पर with respect to a घट). **–6** The other or future world; परासक्ते च वस्तस्मिन् कथमासीन्मनस्तदा Mb. 6. 14. 55. *Note*—The acc., instr. and loc. singulars of पर are used adverbially; *e. g.* (*a*) परम् **1** beyond, over, out of (with abl.); वर्त्मनः परम् R. 1. 17. **–2** after (with abl.); अस्मात् परम् Ś. 6. 24; R. 1. 66; 3. 39; Mc. 102; भाग्यायत्तमतः परम् Ś. 4. 17; ततः परम् &c. **–3** thereupon, thereafter. **–4** but, however. **–5** otherwise. **–6** in a high degree, excessively, very much, completely, quite; परं दुःखितोऽस्मि &c. **–7** most willingly. **–8** only. **–9** at the utmost. (*b*) परेण **1** farther, beyond, more than; किं वा मृत्योः परेण विधास्यति Māl. 2. 2. **–2** afterwards; मयि तु कृतनिधाने किं विदध्याः परेण Mv. 2. 49. **–3** after (with abl.) स्तन्यत्यागात् परेण U. 2. 7. (*c*) परे **1** afterwards, thereupon; अथ तेन दशाहतः परे R. 8. 73. **–2** in future. **–Comp. –अङ्गम्** the hinder part of the body. **–अङ्गदः** an epithet of Śiva. **–अणुः** See परमाणु; Bhāg. 10. 14. 11. **–अदनः** a horse found in the country of Persia or Arabia. **–अधिकारचर्चा** officiousness, meddlesomeness. **–अधीन** *a.* dependent on another, subject, subservient; अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने Ms. 10. 54, 83; H. 1. 119. **–अन्तः** final death. (**–ताः**) *m.* (pl.) N. of a people. **–अन्तकः** an epithet of Śiva. **–2** a frontier. **–अन्तकालः** the time of death; ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे Muṇḍ. 3. 2. 6. **–अन्न** *a.* living or subsisting on another's food. (**–न्नम्**) the food of another; परगृहललिताः परान्नपुष्टाः Mk. 4. 28. °परिपुष्टता being fed with the food of others; Y. 3. 241. °भोजिन् *a.* subsisting on the food of others; रोगी चिरप्रवासी परान्नभोजी परावसथशायी। यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः॥ H. 1. 120. **–अपर** *a.* **1** far and near, remote and proximate. **–2** prior and posterior. **–3** before and beyond, earlier and later. **–4** higher and lower, best and worst. (**–रः**) a *Guru* of an intermediate class. (**–रम्**) (in logic) a property intermediate between the greatest and smallest numbers, a species (as existing between the genus and individual); *e. g.* पृथ्वी which is पर with respect to a घट is अपर with respect to द्रव्य; द्रव्यत्वादिकजातिस्तु परापरतयोच्यते Bhāṣā. P. 8. **–अभिध्यानम्** self-conceit; high opinion for self or body (देहाभिमान); स्वयं पराभिध्यानेन विभ्रंशितस्मृतिः Bhāg. 5. 14. 10. **–अमृतम्** rain. **–अयण (अयन)** *a.* **1** attached or devoted to, adhering to. **–2** depending on, subject to. **–3** intent on, solely devoted to or absorbed in (at the end of comp.); प्रभुर्धनपरायणः Bh. 2. 56; so मोह°; अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता Ku. 4. 1; अग्निहोत्र° &c. **–4** connected with. **–5** being a protector (त्राता); अबर्हाश्चरणैर्हीनाः पूर्वेषां वः परायणाः Mb. 1. 230. 4. **–6** leading or conducive to. (**–णम्**) **1** the principal or highest object, chief aim, best or last resort; एतत् परायणम् Praśna Up. 1. 10; तपसश्च परायणम् Rām. 1. 21. 10; Mb. 12. 179. 12. **–2** essence, sum. **–3** Ved. going away, departure, exit. **–4** firm devotion. **–5** a universal medicine, panacea. **–6** a religious order. **–अर्थ** *a.* **1** having another aim or meaning. **–2** intended or designed for another, done for another. (**–र्थः**) **1** the highest interest or advantage. **–2** the interest of another (opp. स्वार्थ); स्वार्थो यस्य परार्थ एव स पुमानेकः सतामग्रणीः Subhāṣ.; R. 1. 29. **–3** the chief or highest meaning. **–4** the highest object (*i. e.* sexual intercourse). **–5** the supreme good (मोक्ष); ज्ञात्वा प्रजहि कालेन परार्थमनुदृश्य च Mb. 12. 288. 9. **–6** Something else. Hence परार्थता or परार्थत्व means 'being subsidiary to something else; परार्थता हि गुणभावः ŚB. on MS. 4. 3. **–7** an object which is meant for another's use (Sāṅ. Phil.); संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् Sāṅ. K. 17. °वादिन् *a.* speaking for another; mediator, substitute. **–अर्थिन्** *a.* striving for the supreme good. (**–र्थम्, –र्थे**)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



*ind.* for the sake of another. **-अर्धम्** 1 the other part (opp. पूर्वार्ध); the latter half; दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम् Bh. 2. 60. -2 a particular high number; *i. e.* 100,000,000,000,000,000; एकत्वादिपरार्धपर्यन्ता संख्या T. S. **-अर्धक** *a.* One half of anything. **-अर्ध्य** *a.* 1 being on the farther side or half. -2 most distant in number; हेमन्तो वसन्तात् परार्ध्यः Śat. Br. -3 most excellent, best, most exalted, highly esteemed, highest, supreme; R. 3. 27; 8. 27; 10. 64; 16. 39; आबद्धप्रचुरपरार्ध्यकिंकिणीकः Śi. 8. 45. -4 most costly; Śi. 4. 11; श्रियं परार्ध्यां विदधद् विधातृभिः Bu. Ch. 1. 1. -5 most beautiful or lovely, finest; R. 6. 4; परस्परस्पर्धिपरार्ध्यरूपाः पौरस्त्रियो यत्र विधाय वेधाः Śi. 3. 58. -6 Divine: असावादीत् सद्रूप्ये परार्ध्यवत् Bk. 9. 64. (**-र्ध्यम्**) 1 a maximum. -2 an infinite number. **-अवर** *a.* 1 far and near; परावराणां स्रष्टारं पुराणं परमव्ययम् Mb. 1. 1. 23. -2 earlier and later. -3 prior and posterior or subsequent. -4 higher and lower. -5 traditional; पुनाति पङ्क्तिं वंश्यांश्च सप्त सप्त परावरान् Ms. 1. 105. -6 all-including; परावरज्ञोऽसि परावरस्त्वम् Mb. 3. 232. 18. (**-रा**) descendants. (**-रम्**) 1 cause and effect. -2 the whole extent of an idea. -3 the universe. -4 totality. °ज्ञ, °दृश् *a.* knowing both the past and the future; परावरज्ञो ब्रह्मर्षिः Mb. 1. 60. 5. **-अवसथशायिन्** *a.* sleeping in another's house; H. 1. 120. **-अहः** the next day. **-अह्णः** the afternoon, the latter part of the day. **-आगमः** attack of an enemy. **-आचित** *a.* fostered or brought up by another. (**-तः**) a slave. **-आत्मन्** *m.* the Supreme Spirit. **-आयत्त** *a.* 1 dependent on another, subject, subservient; परायत्तः प्रीतेः कथमिव रसं वेत्तु पुरुषः Mu. 3. 4. -2 Wholly subdued or overwhelmed by. **-आयुस्** *m.* an epithet of Brahman; नाहं परायुर्ऋषयो न मरीचिमुख्या जानन्ति यद्विरचितं खलु सत्त्वसर्गाः Bhāg. 8. 10. 12. **-आविद्धः** 1 an epithet of Kubera. -2 of Viṣṇu. **-आश्रय** *a.* dependent upon another. (**-यः**) 1 dependence upon another. -2 the retreat of enemies. (**-या**) a plant growing on another tree. **-आसङ्गः** dependence upon another. **-आस्कन्दिन्** *m.* a thief, robber. **-इतर** *a.* 1 other than inimical, *i. e.* friendly, kind. -2 one's own; विधाय रक्षान् परितः परेतरान् Ki. 1. 14. **-ईशः** 1 an epithet of Brahman. -2 of Viṣṇu. **-इष्टिः** N. of Brahman. **-इष्टुका** a cow which has often calved. **-उत्कर्षः** another's prosperity. **-उद्वहः** the Indian cuckoo. **-उपकारः** doing good to others, benevolence, beneficence, charity; परोपकारः पुण्याय पापाय परपीडनम्. **-उपकारिन्** *a.* benevolent, kind to others. **-उपजापः** causing dissension among enemies; परोपजापात् संरक्षेत् प्रधानान् क्षुद्रकान् अपि Kau. A. 1. 13. **-उपदेशः** advising others; परोपदेशे पाण्डित्यम्. **-उपरुद्ध** *a.* besieged by an enemy. **-उपसर्पणम्** approaching another; begging. **-ऊढा** another's wife. **-एधित** *a.* fostered or brought up by another. (**-तः**) 1 a servant. -2 the (Indian) cuckoo. **-कर्मन्** *n.* service for another. °निरतः a servant. **-कलत्रम्** another's wife. °अभिगमनम् adultery; वरं क्लैब्यं पुंसां न च परकलत्राभिगमनम् H. 1. 116. **-कायप्रवेशनम्** entering another's body (a supernatural art). **-कारः** The deeds of the enemy; राज्ञः समीपे परकारमाह प्रज्ञापनैषा विविधोपदिष्टा Kau. A. 2. 10. **-कार्यम्** another's business or work. °निरतः 1 a benevolent man. -2 a slave, servant. **-काल** *a.* relating to a later time, mentioned later. **-कृतिः** an example or precedent, a passage descriptive of the doings of men; MS. 6. 7. 26. **-क्रमः** doubling the second letter of a conjunction of consonants. **-क्रान्तिः** *f.* inclination of the ecliptic. **-क्षेत्रम्** 1 another's body. -2 another's field; येऽक्षेत्रिणो बीजवन्तः परक्षेत्रप्रवापिणः। ते वै सस्यस्य जातस्य न लभन्ते फलं क्वचित् ॥ Ms. 9. 49. -3 another's wife; तौ तु जातौ परक्षेत्रे Ms. 3. 175. **-गामिन्** *a.* 1 being with another. -2 relating to another. -3 beneficial to another. **-गुण** *a.* beneficial to another. (**-णः**) the virtue of another; परगुणपरमाणून् पर्वतीकृत्य नित्यम् Bh. 2. 78. **-ग्रन्थिः** joint (as of a finger); an articulation. **-ग्लानिः** *f.* subjugation of an enemy; आत्मोदयः परग्लानिर्द्वयं नीतिरितीयती Śi. 2. 30. **-चक्रम्** 1 the army of an enemy. -2 invasion by an enemy, one of the six *itis* q. v. -3 a hostile prince. **-छन्द** *a.* dependent. (**-दः**) 1 the will of another. -2 dependence. °अनुवर्तनम् following the will of another. **-छिद्रम्** a weak or vulnerable point of another, a defect in another. **-ज** *a.* 1 stranger. -2 coming from a foe. -3 inferior. **-जनः** a stranger (opp. स्वजन); शक्तः परजने दाता Ms. 11. 9. **-जन्मन्** *n.* a future birth. **-जात** *a.* 1 born of another. -2 dependent on another for livelihood. (**-तः**) a servant. **-जित** *a.* 1 conquered by another. -2 maintained by another. (**-तः**) the (Indian) cuckoo. **-तन्त्र** *a.* dependent on another, dependent, subservient. **-तन्त्रम्** (a common group of) subsidiaries belonging to another; जैमिनिः परतन्त्रापत्तेः स्वतन्त्रप्रतिषेधः स्यात् MS. 12. 1. 8 (see तन्त्रम्). **-तर्ककः** a suppliant, beggar; Dānasāgara, Bibliotheca Indica, 274, Fascicule 1, p. 15; also परतर्कुक. **-तल्पगामिन्** *m.* One who approaches another man's wife. **-तीर्थिकः** The adherent of another sect. **-दाराः** *m.* (pl.) another's wife; °अभिगमनम्, °अभिमर्शः Adultery. **-दारिन्** *m.* an adulterer. **-दुःखम्** the sorrow or grief of another; विरलः परदुःखदुःखितो जनः; महदपि परदुःखं शीतलं सम्यगाहुः V. 4. 13. **-देवता** the Supreme Being. **-देशः** a hostile or foreign country. **-देशिन्** *m.* a foreigner. **-द्रोहिन्, -द्वेषिन्** *a.* hating others, hostile, inimical. **-धनम्** another's property. **-धर्मः** 1 the religion of another; स्वधर्मे निधनं श्रेयः परधर्मो भयावहः Bg. 3. 35. -2 another's duty or business. -3 the duties of another caste; परधर्मेण जीवन् हि सद्यः पतति जातितः Ms. 10. 97. **-ध्यानम्** absolute meditation or contemplation; ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयत्। यत् तद् ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥ Garuḍa P. **-निपातः** the irregular posteriority of a word in a compound; *i. e.* भूतपूर्वः where the sense is पूर्वं भूतः; so राजदन्तः, अग्न्याहितः &c. **-निर्वाणम्** the highest निर्वाण; (Buddh.). **-पक्षः** the side or party of an enemy. **-पदम्** 1 the highest position, eminence. -2 final beatitude. **-परिग्रह** *a.* see पराधीन; स्ववीर्यविजये युक्ता नैते: पर-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गतिम् Ms. 4. 14; 7. 1; 2. 13. -3 Chief, principal, primary, supreme; सर्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत् Ms. 9. 319. -4 Exceeding, extreme. -5 Adequate, sufficient; परमं यत्नमातिष्ठेत् स्तेनानां निग्रहे नृपः Ms. 8. 302. -6 Worst. -7 Higher than, superior to; न मन्ये वाणिज्यात् किमपि परमं वर्तनमिह Pt. 1. 11. -मम् The utmost or highest; the chief or prominent part; (at the end of comp.) consisting principally of, solely occupied with; कामोपभोगपरमा एतावदिति निश्चिताः Bg. 16. 11; Ms. 6. 96. -मम् *ind.* 1 A particle of assent, acceptance or agreement (well, very well, yes, be it so); ततः परममित्युक्त्वा प्रतस्थे मुनिमण्डलम् Ku. 6. 35. -2 Exceedingly, very much; परमक्रुद्धः &c. -**Comp.** -अक्षरम् the sacred syllable 'om' or Brahma. -अङ्गना an excellent woman. -अणुः an infinitesimal particle, an atom; सिकतात्वादपि परां प्रपेदे परमाणुताम् R. 15. 22; परगुणपरमाणून् पर्वतीकृत्य नित्यम् Bh. 2. 78; पृथ्वी नित्या परमाणुरूपा T. S.; (a परमाणु is thus defined:— जालान्तरस्थसूर्यांशौ यत् सूक्ष्मं दृश्यते रजः। भागस्तस्य च षष्ठो यः परमाणुः स उच्यते ॥ Tarka K., or less accurately :— जालान्तरगते रश्मौ यत् सूक्ष्मं दृश्यते रजः। तस्य त्रिंशत्तमो भागः परमाणुः स उच्यते ॥) °अङ्कः an epithet of Viṣṇu. -अद्वैतम् 1 the Supreme Spirit. -2 pure unitarianism. -अन्नम् rice boiled in milk with sugar. -अपमः the inclination of a planet's orbit to the ecliptic. -अर्थः 1 the highest or most sublime truth, true spiritual knowledge, knowledge about Brahman or the Supreme Spirit; इदं हि तत्त्वं परमार्थभाजाम् Mv. 7. 2. -2 truth, reality, earnestness; परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः Ś. 2. 19; oft in comp. in the sense of 'true' or 'real'. °मत्स्याः R. 7. 40. Mv. 4. 30. -3 any excellent or important object. -4 the best sense. -5 the best kind of wealth. °दरिद्र really poor; Mk. °भाज *a.* partaking of the highest truth; Mv. °विद् a philosopher. -अर्थतः *ind.* truly, really, exactly, accurately; विकारं खलु परमार्थतोऽज्ञात्वाऽनारम्भः प्रतीकारस्य Ś. 4; उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम् Ku. 5. 75; Pt. 1. 136. -अहः an excellent day. -आत्मन् *m.* the Supreme Spirit or Brahman; न च योगविधेर्नवेतरः स्थिरधीरा परमात्मदर्शनात् R. 8. 22; स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः। यदुपास्तिमसावत्र परमात्मा निरूप्यते ॥ Kusum. -आनन्दः 'supreme felicity', Supreme Spirit. -आपद् *f.* the greatest calamity or misfortune. -आयुधम् the wheel (चक्र); शूलैः प्रमथिताः केचित् केचित्तु परमायुधैः Rām. 6. 58. 12. -आर्यः a Bodhisattva (q. v.). -इष्वासः an excellent archer. -ईशः an epithet of Viṣṇu. -ईश्वरः 1 an epithet of Viṣṇu. -2 of Indra. -3 of Śiva. -4 the Almighty god, the Supreme Being. -5 N. of Brahman. -6 a universal monarch, sovereign of the world; see चक्रवर्तिन्. -ऋषिः a great sage. -ऐश्वर्यम् supremacy. -काण्डः,-ण्डम् a very auspicious moment. -क्रान्तिः *f.* the sine of the greatest declination. -गतिः *f.* 1 any chief object or refuge (as a god). -2 final beatitude, emancipation. -गवः an excellent bull or cow. -गहन *a* very myserious, profound. -तत्त्वम् the highest truth. -धर्मात्मन् *a.* very dutiful, virtuous. -पदम् 1 the best position, highest rank. -2 final beatitude; विष्णोः पदे परमे मध्व उत्सः Rv. 1. 154. 5. -परम *a.* most excellent of all. -पुंस् the Supreme Spirit; N. of Viṣṇu. -पुरुषः, -पूरुषः the Supreme Spirit. -प्रख्य *a.* celebrated, renowned. -ब्रह्मन् *n.* the Supreme Spirit. -मुद्रा *f.* One of the poses of goddess त्रिपुरा. -रसः butter-milk mixed with water. -राजः a supreme monarch. -समुदय *a.* very auspicious or successful; परमसमुदयेनाश्वमेधेन चेष्ट्वा Mk. 1. 4. -सम्मत *a.* highly esteemed; much revered. -हंसः an ascetic of the highest order, one who has controlled and subdued all his senses by abstract meditation; cf. कुटीचक; कुटीचको बहूदकः हंसश्चैव तृतीयकः। चतुर्थः परमो हंसो यो यः पश्चात् स उत्तमः ॥ Hārītasmṛiti. °परिव्राजकाचार्यः N. of Śaṅkarāchārya.

परमक *a.* Highest, most excellent, best &c.; also परमिक; चतुर्णामात्मजानां हि प्रीतिः परमिका मम Rām. 1. 20. 11.

परमतः *ind.* In the highest degree, exceedingly, very much.

परमता 1 Highest rank, position; यद्यपि राजा परमतां गच्छति ब्रह्मैवान्तत उपनिश्रयति Bri. Up. 1. 4. 11. -2 Highest aim or end.

परंतप *a.* Destroying foes (a hero).

परंपदम् 1 The abode of Viṣṇu. -2 Eternal felicity. -3 A high position.

परमेष्ठ *a.* Superior, supreme -ष्ठः 1 An epithet of Brahman. -2 A deity.

परमेष्ठिन् *a* Standing at the head, highest, chief; परमेष्ठिनां प्रभुः Bhāg. 10. 89. 58. -*m.* 1 An epithet of Brahman. -2 Of Śiva. -3 Of Viṣṇu. -4 Of Garuḍa. -5 Of Agni. -6 Any spiritual teacher. -7 (with Jainas) An Arhat.

परंपर *a.* One following the other; परंपराणां भक्षिष्ये वानराणां मृतं मृतम् Rām. 4. 56. 5. -2 Successive, repeated. -रः 1 A great-grandson. -2 A kind of deer -रा 1 An uninterrupted series, regular series, succession; महनीयं खल्वनर्थपरंपरा K. 103; कर्णपरंपरया 'from ear to ear, by hear-say'; परंपरया आगम् 'to be handed down in regular succession'. -2 A row, line, collection, assemblage (of regular things); तोयान्तर्भास्करालीव रेजे मुनिपरंपरा Ku. 6. 49; R. 6. 5, 35, 40; 12. 100. -3 Method, order, due arrangement; एवं परंपराप्राप्तमिमं राजर्षयो विदुः Bg. 1. 2. -4 Race, family, lineage. -5 Injury, hurting, killing. -**Comp.** -यात *a.* received by tradition. -वाहनम् an indirect means of conveyance (such as horse which draws the carriage). -सम्बन्धः an indirect conjunction; cf. P. VIII. 1. 24 com. -रम् *ind.* Successively, one after the other.

परंपराक *a.* Immolating an animal at a sacrifice.

परंपरित *a.* Continuous, forming a series.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**परंपरीण** *a.* 1 Obtained by succession or descent, hereditary; लक्ष्मीं परंपरीणां त्वं पुत्रपौत्रीणतां नय Bk. 5. 15. -2 Traditional.

**परवत्** *a.* 1 Dependent upon or subject to another, ready to obey; सा बाला परवतीति मे विदितम् Ś. 3. 2; भगवन्-परवानयं जनः R. 8. 81; 2. 56; oft. with instr. or loc. of person; भ्रात्रा यदित्थं परवानसि त्वम् R. 14. 59. -2 Deprived of strength, rendered powerless; परवानिव शरीरोपतापेन Māl. 3. -3 Completely under the influence of (another), not master of oneself, overpowered or overcome; विस्मयेन परवानस्मि U. 5; आनन्देन परवानस्मि U. 3; साध्वसेन Māl. 6. -4 Devoted to.

**परवत्ता** Subjection to another, dependence; न हि सुलभवियोगा कर्तुमात्मप्रियाणि प्रभवति परवत्ता V. 5. 17.

**परजः** 1 An oil-mill. -2 The blade of a sword. -3 Foam. -4 A scymitar. -**जा** The sounds of instruments at festivals. -**जम्** Indra's sword.

**परशः** A kind of stone or gem, the touch of which is said to turn other metals, such as iron, into gold; perhaps the philosopher's stone.

**परशुः** [ परं-शृणाति, शॄ-कु डिच्च; cf. Uṇ. 1. 34 ] 1 An axe, a hatchet, a battle-axe; तर्जितः परशुधारया मम R. 11. 78. -2 A weapon in general. -3 A thunderbolt. -**Comp.** -**धरः** 1 an epithet of Paraśurāma. -2 of Gaṇeśa. -3 a soldier armed with an axe. -**मुद्रा** a kind of pose in Tantraśāstra. -**रामः** 'Rāma with the axe', N. of a celebrated Brāhmaṇa warrior, son of Jamadagni and the sixth incarnation of Viṣṇu. [While young he cut off with his axe the head of his mother Reṇukā at the command of his father when none of his other brothers was willing to do so; (see जमदग्नि). Some time after this, king Kārtavīrya went to the hermitage of his father, and carried off his cow. But Paraśurāma, when he returned home, fought with the king and killed him. When his sons heard this they became very angry, and repaired to the hermitage, and on finding Jamadagni alone, they shot him dead. When Paraśurāma, who was not then also at home, returned, he became very much exasperated, and made the dreadful vow of exterminating the whole Kṣatriya race. He succeeded in fulfilling this vow, and is said to have 'rid the earth thrice seven times of the royal race'. He was afterwards, destroyer of the Kṣatriyas as he was, defeated by Rāma, son of Daśaratha, though quite a boy of sixteen (see R. 11. 68-91). He is said to have at one time pierced through the Krauñcha mountain, being jealous of the might of Kārtikeya; cf. Me. 57. He is one of the seven *chirajīvins*, and is believed to be still practising penance on the Mahendra mountain; cf. Gīt 1.:— क्षत्रियरुधिरमये जगदपगतपापं स्नपयसि पयसि शमितभवतापम् । केशव धृतभृगुपतिरूप जय जगदीश हरे । ]. -**वनम्** N. of a certain part of hell.

**परश्व (स्व) धः** A hatchet, a battle-axe; धारां शितां रामपरश्वधस्य संभावयत्युत्पलपत्रसाराम् R. 6. 42.

**परस्** *ind.* (Rarely used by itself in classical Sanskrit) 1 Beyond, further, more than; परोरजः सवितुर्जातवेदः Bhāg. 5. 7. 14. -2 On the other side of. -3 Far away, at a distance -4 With the exception of. -5 Ved. In future, afterwards. -**Comp.** -**कृष्ण** *a.* very black. -**पुंसा** Ved. a woman not satisfied with her husband (and therefore seeking for a paramour). -**पुरुष** *a.* higher than a man. -**शत** *a.* more than a hundred; स जवेन पतन् परःशतानां पततां व्रात इवारवं वितेने Ki. 13. 26; Śi. 12. 50. -**श्वस्** *ind.* the day after tomorrow. -**सहस्र** *a.* more than a thousand; परःसहस्राः शरदस्तपांसि तप्त्वा U. 1. 15; परःसहस्रैः पिशाचैः Mv. 5. 17.

**परस्तात्** *ind.* 1 Beyond, on the other side of, further than (with gen.); आदित्यवर्णं तमसः परस्तात् Bg. 8. 9. -2 Hereafter, afterwards; परस्तादवगम्यते Ś. 1. -3 Higher than. -4 Ved. From above. -5 Aside, apart.

**परस्पर** *a.* 1 Mutual; परस्परस्य मर्माणि ये न रक्षन्ति जन्तवः । त एव निधनं यान्ति वल्मीकोदरसर्पवत् ॥ Pt. 3. 186; परस्परां विस्मयवन्ति लक्ष्मीमालोकयांचक्रुरिवादरेण Bk. 2. 5. -2 (pl.) Like one another; Mb. 12. -*pron.*, *a.* Each other, one another (used in the sing. only; often in comp.); परस्परस्योपरि पर्यचीयत R. 3. 24; 7. 38; अविज्ञातपरस्परैः अपसर्पैः 17. 51; परस्पराक्षिसादृश्यम् 1. 40; 3. 24. *Note*:— The acc. and abl. singulars are often used adverbially in the sense of 'mutually', reciprocally', 'one another', 'by, from' or 'to one another', 'against one another' &c.; see परस्परं भावयन्तः श्रेयः परमवाप्स्यथ Bg. 3. 11; 10. 9; R. 4. 79; 6. 46; 7. 14, 53; 12. 94. -**Comp.** -**अदिन्** *a.* consuming one another; परस्परादिनस्स्तेनाः (भवन्ति) Ms. 12. 59. -**ज्ञः** a friend. -**विलक्षण** *a.* mutually opposing; परस्परविलक्षणा गुणविशेषाः Saṅ. K. 36. -**व्यावृत्तिः** *f.* mutual exclusion. -**स्थित** *a.* standing opposite to one another.

**परस्मैपदम्**, -**परस्मैभाषा** 'A voice for another', one of the two voices in which verbs in Sanskrit are conjugated; आत्मनेपदनिमित्तहीनाद् धातोः परस्मैपदं स्यात्.

**परा** *ind.* A prefix to verbs and nouns in the sense of 'away, back, in an inverted order, aside, towards'. According to G. M. the senses of परा are:— 1 killing, injuring & (पराहत). -2 going (परागत). -3 seeing, encountering (परादृष्ट). -4 prowess (पराक्रान्त). -5 direction towards (परावृत्त). -6 excess (पराजित). -7 dependence (पराधीन). -8 liberation (पराकृत). -9 inverted order, backwards (पराङ्मुख). -10 setting aside, disregarding.

**पराक्** See पराच्; पुनरासाद्य संरब्ध उपक्रोष्टा पराक् स्थितः Bhāg. 10. 15. 31.

**पराक** *a.* Small. -**कः** 1 A sacrificial sword. -2 A kind of penance; यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् । पराको

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाम कृच्छ्रोऽयं सर्वपापापनोदनः Ms. 11. 215; N. 17. 193. द्वादशाहोपवासेन पराकः परिकीर्तितः; U. 4. -3 A kind of disease.

**पराकाशः** 1 Remote expectation or hope. -2 Distant view.

**पराकृ** 8 U. To reject, disregard, slight, take no notice of; तां हनूमान् पराकुर्वन्नगमत् पुष्पकं प्रति Bk. 8. 50.

**पराकरणम्** The act of setting aside, rejecting, disregarding, disdaining.

**पराकृष्ट** *a*. Disparaged, reviled.

**पराके** *ind*. At a distance ( Ved ).

**पराक्रम्** 1 U. 1 To display courage, strength or heroism, act bravely; बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत् Ms. 7. 106; इत्युक्त्वा खे पराक्रंस्त Bk. 8. 22, 94. -2 To turn back. -3 To march against, attack. -4 To march forward, advance.

**पराक्रमः** 1 Heroism, prowess, courage, valour; पराक्रमः परिभवे Śi. 2. 44. -2 Marching againt, attack. -3 Attempt, endeavour, enterprise. -4 N. of Viṣṇu.

**पराक्रमिन्** *a*. Heroic, spirited, courageous, valiant.

**पराक्रान्त** *p. p.* 1 Strong, valiant, bold, energetic; शक्रतुल्यपराक्रान्तम् Rām. 4. 19. 23; Mb. 7. 65. 3. -2 Attacked. -3 Turned back.

**पराक्षिप्त** *a*. Upset, wrested away. -**Comp.** -**मनस्** *a*. having the mind carried away, enraptured.

**परागः** 1 The pollen of a flower; स्फुटपरागपरागतपङ्कजम् Śi. 6. 2; Amaru. 54. -2 Dust in general; प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् R. 4. 30. -3 Fragrant powder used after bathing. -4 Sandal. -5 An eclipse of the sun or moon. -6 Fame, celebrity. -7 Independence, self-will. -8 Medicinal powder; Mātaṅga L. 11. 28. -9 Powder; कायेऽपि कर्पूरपरागपूरः Mv. 7. 17.

**परागम्** 1 P. 1 To return; तदयं परागत एवास्मि U. 5. -2 To surround, encompass, pervade; स्फुटपरागपरागतपङ्कजम् Śi. 6. 2. -3 Ved. To go away, depart. -4 To die.

**परागत** *p. p.* 1 Dead. -2 Covered with, surrounded. -3 Spread, expanded.

**परागमः** Invasion.

**पराङ्गवः** The ocean.

**पराच्, पराञ्च्** *a*. ( -ची *f*. ) 1 Situated beyond or on the other side; ये चामुष्मात् पराञ्चो लोकाः Ch. Up; दिग्देशकालवचनो हि पराक्शब्दो भवति ŚB. on MS. 10. 5. 47. -2 Having the face turned away; आत्मीयास्ते ये पराञ्चः पुरस्तात् ( पराङ्मुख ); Śi. 18. 18. -3 Unfavourable, adverse; दैवे पराचि Bv. 1. 105; or दैवे पराग्वदनशालिनि हन्त जाते 3. 1. -4 Distant. -5 Directed outwards; पराङ् पश्यति नान्तरात्मन् Kaṭh. 2. 1. 1; Bhāg. 8. 19. 9. -6 Turned away, averted. -7 Departing or returning from. -8 Inverted, reversed. -9 Not repeated; अनभ्यासे पराक्शब्दस्य तादर्थ्यात् MS. 10. 5. 45; अनभ्यासे पराक्शब्दो वर्तते ŚB. On MS. 10. 5. 45. -*n*. The body; यदात्मानं पराग्गृह्य पशुवद्भूतवैशसम् Bhāg. 4. 11. 10. -*ind*. 1 Away, off. -2 Outwards. -**Comp.** -**दृश्** *a*. having the eyes turned towards the outer world. -**पुष्पः** The कदम्ब tree. -**पुष्पी** The अपामार्ग tree ( Mar. आघाडा ). -**मुख** *a*. ( **पराङ्मुख** ) 1 having the face turned away or averted, turning the back upon; विग्रहाच्च शयने पराङ्मुखीर्नानुनेतुमबलाः स तत्वरे R. 19. 38; Amaru. 90; Ms. 2. 195; 10. 119. -2 ( *a* ) averse from; मातुर्न केवलं स्वस्याः श्रियोऽप्यासीत् पराङ्मुखः R. 12. 13. ( *b* ) not disposed towards, shunning, avoiding; प्रवृत्तिपराङ्मुखो भावः V. 4. 20; Ś. 5. 28. -3 adverse, unfavourable; तनुरपि न ते दोषोऽस्माकं विधिस्तु पराङ्मुखः Amaru. 30. -4 not caring about, regardless of; मर्त्येष्वास्थापराङ्मुखः R. 10. 43. ( -**खः** ) a magical formula pronounced over weapons. -**खम्**, -**मुखता**, -**मुखत्वम्** Turning away, aversion.

**पराचीन** *a*. [ पराच्-ख ] 1 Turned in an opposite direction, averted; पराचीनोऽभवत्तेभ्यः Śiva B. 27. 42. -2 Averse from, disinclined to. -3 Not minding, not caring about. -4 Happening subsequently or afterwards ( उत्तरकालभव ). -5 Situated on the other side, being beyond; न कदाचित् पराचीना भवितुमुत्सहन्ते Bhāg. 5. 20. 37. -6 Unfit, improper. -7 Outward ( बहिर्मुख ); ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम् Bhāg. 3. 32. 28. -**त्तम्** *ind*. 1 Away from, beyond. -2 More than. -**Comp.** -**रात्रम्** the second half of the night.

**पराजि** 1 Ā. 1 To defeat, conquer, overcome, subdue; यं पराजयसे मृषा Y. 2. 75; Bk. 8. 9; Śi. 19. 82. -2 To lose, be deprived of. -3 To be conquered or overcome by, find ( something ) unbearable; अध्ययनात् पराजयते Sk. ' finds it unbearable or difficult to study '; तां पराजयमानां स प्रीतेः रक्ष्यां दशाननात् Bk. 8. 71. -4 To submit or yield to.

**पराजयः** 1 Overpowering, conquest, conquering, subjugating, defeat; विष्टपत्रयपराजयस्थिरां रावणश्रियमपि व्यकम्पयत् *R. 11. 19; Ms. 7. 199.* -2 *Being* overcome *by*, not being able to suffer ( with abl. ); as in अध्ययनात् पराजयः -3 Losing, loss, failure ( as in a law-suit ); अन्यथावादिनो ( साक्षिणः ) यस्य ध्रुवस्तस्य पराजयः Y. 2. 79. -4 Deprivation. -5 Desertion.

**पराजित** *p. p.* 1 Conquered, subjugated, defeated. -2 Condemned by law, cast or defeated ( as in a law-suit ).

**पराजिष्णु** *a*. 1 Victorious. -2 Conquered, defeated.

**पराञ्जः** 1 An oil-mill. -2 Foam. -3 The blade of a sword or knife.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पराडीनम्** Flying backward 'पश्चाद्गतिः पराडीनम्'; Mb. 8. 41. 27.

**पराणुत्तिः** *f.* Driving away, expelling, removing.

**परातंसः** The being thrushed or pushed aside.

**परात्परः** The Supreme Being. *-a.* Supreme; परात्परं पुरुषमुपैति दिव्यम्.

**परादा** 3 U. Ved. 1 To give or hand over, deliver. -2 To throw away, squander. -3 To give away or exchange for (with dat.). -4 To exclude from.

**परादानम्** 1 Giving up or away. -2 Exchanging.

**पराधिः** 1 Hunting, chase. -2 Extreme mental pain.

**परान(ण)सा** Medical treatment, practice of medicine.

**परापत्** 1 P. 1 To arrive, draw near, approach. -2 To return. -3 To escape. -4 To depart. -5 To fall out. -6 To fail. *-Caus.* To chase or drive away.

**पराभू** 1 P. 1 To defeat, vanquish, overcome. -2 To hurt, injure, tease. -3 To vanish, disappear. -4 To perish, be lost. -5 To submit, yield. *-Caus.* 1 To defeat, overcome. -2 (Ā.) To vanish, disappear. -3 To suffer a loss.

**पराभवः** 1 (*a*) Defeat, discomfiture, overthrow; पराभवोऽप्युत्सव एव मानिनाम् Ki. 1. 41. (*b*) Mortification, humiliation; कुबेरस्य मनःशल्यं शंसतीव पराभवम् Ku. 2. 22; तव पद्मपल्लववैरिपराभवमिदमनुभवतु सुवेशम् Gīt. 12. -2 Contempt, disregard, disrespect. -3 Destruction. -4 Disappearance, separation (sometimes written पराभाव). -5 N. of the 40 th year in the cycle of 60 years.

**पराभावः** Same as पराभव; Mb.

**पराभावनम्** Suppression.

**पराभावुक** *a.* About to decline, going to pass away.

**पराभूत** *p. p.* 1 Defeated, overcome. -2 Treated with contempt, degraded, dishonoured.

**पराभूतिः** *f.* See पराभव; दैन्यस्य पात्रतामेति पराभूतेः परं पदम् Pt. 2. 97.

**परामृत** *a.* One who has overcome death.

**परामृश्** 6 P. 1 To touch, rub or stroke gently; परामृशन् हर्षजडेन पाणिना तदीयमङ्गं कुलिशव्रणाङ्कितम् R. 3. 68; Śi. 17. 11; Mk. 5. 28. -2 To lay hands on, attack, assail, seize; Mk. 1. 39. -3 To defile, pollute, outrage (a woman or a temple). -4 To reflect, think, consider किं भवितेति सशङ्कं पङ्कजनयना परामृशति Bv. 2. 53. -5 To think mentally of, praise (स्तु); ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति K. P. 1. -6 To have reference to, point to.

**परामर्शः** 1 Seizing, pulling; as in केशपरामर्शः. -2 Bending or drawing (as a bow). -3 Violence, attack, assault; याज्ञसेन्याः परामर्शः Mb. -4 Disturbance, hindrance; तपःपरामर्शविवृद्धमन्योः Ku. 3. 71. -5 Calling to mind, recollection. -6 Consideration, reflection, thought. -7 Judgment. -8 (In logic) Deduction, ascertaining that the पक्ष or subject possesses the हेतु; व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः T. S; or व्याप्तस्य पक्षधर्मत्वधीः परामर्श उच्यते Bhāṣā P. 66. -9 Touching, striking gently. -10 Affection (by disease).

**परामर्शनम्** 1 Remembrance. -2 Consideration, reflection, thought.

**परामृष्ट** *p. p.* 1 Touched, handled, seized, grasped. -2 Roughly treated, violated. -3 Weighed, considered, judged. -4 Endured. -5 Connected with. -6 Afflicted by (as a disease); see परामृश्.

**परारि** *ind.* The year before last.

**परायण** See under पर (पर-अयन).

**परारुः** The tree called कारवेल्ल.

**परारुकः** A stone or rock.

**परावसुः** N. of the 40th year in the cycle of 60 year; cf. पराभव.

**परावाकः** Contradiction (Ved.)

**पराविद्धः** N. of Kubera.

**परावृत्** *ind.* Ved. At a distance.

**परावृत्** 1 Ā. To return, turn back.

**परावर्तः** 1 Turning back, return, retreat. -2 Exchange, barter. -3 Restoration. -4 Reversal of a sentence (in law).

**परावर्त्य** *a.* To be turned back or exchanged or reversed or restored. **-Comp.** **-व्यवहारः** (in law) an appeal.

**परावृत्त** *p. p.* 1 Returned, turned back. -2 Revolved. -3 Exchanged. -4 Reversed (as a judgment). -5 Restored, given back.

**परावृत्तिः** *f.* 1 = परावर्तः above. -2 Recoiling. -3 Not taking effect.

**परावहः** N. of one of the seven winds (the other six are:— आवह, उद्वह, परिवह, प्रवह, विवह and संवह).

**पराव्याधः** 1 A stone's throw. -2 The range of any missile.

**पराशरः** N. of a celebrated sage, father of Vyāsa and the author of a Smṛiti.

**पराशरिन्** *m.* A beggar, mendicant.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**परास्** 4 P. 1 To leave, give up, quit, abandon; परास्तवसुधा सुधाधिवसति Ki. 5. 27. -2 To expel. -3 To reject, repudiate; इति यदुक्तं तदपि परास्तम् S. D. 1.

**परासिसिषु** *a.* Wishing to drive away; द्विषतः परासिसिषुरेष: Ki. 12. 34.

**परासः** The range of anything thrown. **-सम्** Tin.

**परासनम्** Killing, slaughter.

**परास्त** *p. p.* 1 Thrown or cast away. -2 Expelled, turned out. -3 Repudiated. -4 Refuted, rejected. -5 Defeated, overcome.

**परासिक्त** *a.* 1 Thrown away. -2 Set aside, rendered useless.

**परासु** *a.* 1 Lifeless, dead; प्राक् परासुर्द्विजात्मजः R.15.56; 9. 78. -2 One whose vital spirit is departed. **-परासुता, -परासुत्वम्** 1 Exhaustion, death; व्रजति पुरा हि परासुतां त्वदर्थे Ki. 10. 50. -2 A dependent life (पराधीनप्राणत्व); लोभान्मोहश्च माया च मानस्तम्भः परासुता Mb. 12. 158. 4.

**परासेधः** Arrest, imprisonment.

**परास्कन्दिन्** *m.* A thief.

**पराहन्** 2 P. 1 To strike or beat back, strike down, repulse, repel, overthrow, drive back; दैवं मत्पौरुषपराहतम् Rām. -2 To attack, assail; कटाक्षपराहतं वदनपङ्कजम् Māl. 7. -3 To dash against, strike.

**पराहत** *p. p.* 1 Struck down or back. -2 Driven back, repelled, repulsed. -3 Assailed, attacked. **-तम्** A stroke. **-तिः** *f.* Contradiction.

**परि** *ind.* (Sometimes changed to परी, as परिवाह or परीवाह, परिहास or परीहास) 1 As a prefix to verbs and nouns derived from them, it means (*a*) round, round about, about; (*b*) in addition to, further; (*c*) opposite to, against; (*d*) much, excessively. -2 As a separable preposition it means (*a*) towards, in the direction of, to, opposite to (with an acc.); वृक्षं परि विद्योतते विद्युत्; (*b*) successively, severally (with an acc.); वृक्षं वृक्षं परि सिञ्चति 'he waters tree after tree'; (*c*) *to the share or lot of* (*showing* भाग *or participation*) (with acc.); यदत्र मां परि स्यात् 'what may fall to my lot'; or लक्ष्मीर्हरिं परि Sk.; (*d*) from, out of; (*e*) except, outside of, with the exception of (with abl.); परि त्रिगर्तेभ्यो वृष्टो देवः or पर्यनन्तात् त्रयस्तापाः Vop.; (*f*) after the lapse of; परि संवत्सरात्; (*g*) in consequence of; (*h*) beyond, more than; भृत्याः परि चतुर्दश Mb. 3. 1. 11 (com. अधिकचतुर्दशाः पञ्चदशेत्यर्थः); (*i*) according to, in accordance with; (*j*) above, over. -3 As an adverbial prefix to nouns not directly connected with verbs, it means 'very', 'very much', 'excessively'; as in पर्यश्रु 'bursting into tears'; so परिचतुर्दशन्, परिदौर्बल्य. -4 At the beginning of adverbial compounds परि means (*a*) without, except, outside, with the exception of; as in परित्रिगर्तं वृष्टो दिवः P. II. 1. 12; VI. 2. 33. (According to P. II. 1. 10 परि may be used at the end of adverbial comp. after अक्ष, शलाका, and a numeral to denote loss or defeat in a game by an unlucky or adverse cast of dice' (द्यूतव्यवहारे पराजये एवायं समासः) *e. g.* अक्षपरि, शलाकापरि, एकपरि; cf. अक्षपरि; (*b*) round about, all round, surrounded by; as in पर्यग्नि 'in the midst of flames'. -5 At the end of an adjectival comp. परि has the sense of 'exhausted by', or 'feeling repugnance for'; as in पर्यध्ययनः = परिग्लानोऽध्ययनाय.

**परिकथा** 1 A religious tale or narrative; Buddh. Divyāvadāna.-2 A work giving the history and adventures of a fabulous person, a work of fiction. -3 A fairy tale.

**परिकन्दल** *a.* Full of, teeming with (in comp.).

**परिकम्पः** 1 A great terror. -2 Violent tremour or trembling; विरमतु परिकम्पः कातरे क्षत्रियासि Mv. 2. 27.

**परिकरः** 1 Retinue, train, attendants, followers. -2 A multitude, collection, crowd; संध्याक्षुण्णावशिष्टस्वकरपरिकरस्पृष्टहेमारपङ्क्तिः Ratn. 3. 5. -3 A beginning, commencement; गतानामारम्भः किसलयितलीलापरिकरः Bh. 1. 6. -4 A girth, waist-band, cloth worn round the loins; अहिपरिकरभाजः Śi. 4. 65; परिकरं बन्ध् or कृ 'to gird up one's loins, to make oneself ready, prepare oneself for any action'; बध्नन् सवेगं परिकरम् K. 170; कृतपरिकरः कर्मसु जनः Śivamahimna 20; कृतपरिकरस्य भवादृशस्य त्रैलोक्यमपि न क्षमं परिपन्थीभवितुम् Ve. 3; G. L. 47; बद्धो मानपरिग्रहे परिकरः सिद्धिस्तु दैवे स्थिता Amaru. 97; U. 5. 12. -5 A sofa. -6 (in Rhet.) N. of a figure of speech which consists in the use of significant epithets; विशेषणैर्यत् साकूतैरुक्तिः परिकरस्तु सः K. P. 10; *e. g.* सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः Chandr. 5. 59. -7 (In dramaturgy) Covert or indirect intimation of coming events in the plot or a drama, the germ or the बीज q. v; see S. D. 340. -8 Judgment. -9 A helper, colleague, co-worker.

**परिकर्तनम्** 1 Cutting, cutting off. -2 A circular incision. -3 Cutting out. -4 A shooting pain.

**परिकर्तिका** *A sharp shooting pain, especially in the* rectum.

**परिकर्तृ** *m.* A priest who performs the marriage ceremony of a younger brother whose elder brother is not yet married; परिकर्ता याजकः Hārīta; cf. परिवेत्तृ.

**परिकर्मन्** *m.* A servant. *-n.* 1 Painting or perfuming the body, personal decoration, dressing, toilet; कृताचारपरिकर्माणम् S. 2. -2 Painting or dyeing the foot; असमाप्ते परिकर्मणि स्मृतः Ku. 4. 19. -3 Preparation. -4 Worship, adoration; अविक्रमस्ते परिकर्मणि स्थितः Bhāg. 2. 9. 29. -5 (In Yoga phil.) Purifying, a means of purifying the mind; मैत्र्यादिचित्तपरिकर्मविदो विधाय क्लेशप्रहाण-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मिह लब्धसबीजयोगाः Śi. 4. 55 (see Malli. thereon). -6 An arithmetical operation (of which there are 8 divisions). -Comp. -अष्टकम् the eight fundamental rules of arithmetic *viz.* (addition, subtraction, multiplication, division, finding the square, extracting the square root, finding the cube, extracting the cube root).

**परिकर्मयति** Den. P. To decorate, adorn.

**परिकर्मित** *a.* Decorated, adorned; त्रिस्रोतसा परिकर्मितशिखरे इव हिमवान् Cholachampūkāvya, p. 5.

**परिकर्मिन्** *m.* An assistant, a servant, slave.

**परिकल्** 10 U. 1 To know, consider, regard. -2 To be aware of, remember.

**परिकलयितृ** *a.* Surrounding, encircling; Mv.

**परिकलितम्** Comprehending, knowing.

**परिकल्कनम्** Deceit, cheating, roguery.

**परिकाङ्क्षितः** A religious mendicant or ascetic, a devotee.

**परिकूटम्** A barrier, a trench before the gate of a town.

**परिकृश** *a.* Very thin, emaciated.

**पितृ** *m.* [ पाति रक्षति, पा-तृच् नि० ] A father; तेनास लोकः पितृमान् विनेत्रा R. 14. 23; 1. 24; 11. 67. **-रौ** (dual) Parents, father and mother; जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ R. I. 1; Y. 2. 117. **-रः** (pl.) -1 Fore-fathers, ancestors, fathers; नूनं प्रसूतिविकलेन मया प्रसिक्तं धौताश्रुशेषमुदकं पितरः पिबन्ति Ś. 6. 24. -2 Paternal ancestors taken collectively; अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः Ms. 2. 151. -3 The Manes; R. 2. 16; 3. 20; पितॄणामर्यमा चास्मि Bg. 10. 29; Ms. 3. 81, 192. **-Comp. -अर्जित** *a.* acquired by a father, paternal (as property). **-कर्मन्** *n.*, **-कार्यम्, -कृत्यम्, -क्रिया** oblations or sacrifice offerd to deceased ancestors, obsequial rites; स्वधाकारः परा ह्याशीः सर्वेषु पितृकर्मसु Ms. 3. 252. **-कल्पः** 1 performance of the Śrāddha ceremony in honour of the Manes. -2 Brahma's day of new moon. **-काननम्** a cemetery; अभ्यभावि भरताग्रजस्तया वात्येव पितृकाननोत्थया R. 11. 16. **-कुल्या** N. of a river rising in the Malaya mountain. **-क्षयः** the death anniversary; आनन्त्याय भवेद् दत्तं खड्गमांसं पितृक्षये Mh. 13. 88. 10. **-गणः** 1 the whole body of ancestors taken collectively. -2 a class of Manes or deceased progenitors who were sons of the Prajāpati; मनोर्हैरण्यगर्भस्य ये मरीच्यादयः सुताः। तेषामृषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः॥ विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः। अग्निष्वात्ताश्च देवानां मारीचा लोकविश्रुताः॥ Ms. 3. 194-195. **-गणा** N. of of Durgā. **-गामिन्** *a.* devolving on, or belonging to a father. **-गृहम्** 1 a paternal mansion. -2 a cemetery, burial-ground. **-घातकः, -घातिन्, -घ्नः** *m.* a parricide. **-तर्पणम्** 1 an oblation to the Manes. -2 the act of throwing water out of the right hand (as at the time of ablutions) as an offering to the Manes or deceased ancestors; नित्यं स्नात्वा शुचिः कुर्याद् देवर्षिपितृतर्पणम् Ms. 2. 176. -3 sesamum. -4 gifts given at Srāddhas or funeral rites. -5 the part of the hand between the thumb and the fore-finger (sacred to the Manes). **-तिथिः** *f.* the day of new-moon (अमावास्या). **-तीर्थम्** 1 N. of the place called Gayā where the performance of funeral rites, such as Srāddhas in honour of the Manes, is held to be particularly meritorious. -2 the part of the hand between the fore-finger and the thumb (considered to be sacred to the Manes). **-त्रयम्** father, grand-father and great grand-father. **-दत्त** *a.* given by a father (as a woman's peculiar property). **-दानम्** an offering to the Manes. **-दायः** patrimony. **-दिनम्** the day of new-moon (अमावास्या). **-देव** *a.* 1 worshipping a father. -2 relating to the worship of the Manes. (**-वाः**) the divine Manes. **-दे (दै) वत** *a.* 1 presided over by the Manes. -2 relating to the worship of the Manes. (**-तम्**) N. of the tenth lunar mansion (मघा). **-दे (दै) वत्य** *a.* belonging to the worship of the Manes. (**-त्यम्**) a sacrifice offered to the Manes on the day called अष्टका; अष्टकापितृदेवत्यमित्ययं प्रसृतो जनः Rām. 2. 108. 14. **-द्रव्यम्** patrimony; पितृद्रव्याविरोधेन यदन्यत् स्वयमर्जितम् Y. 2. 118. **-पक्षः** 1 the paternal side, paternal relationship. -2 a relative by the father's side. -3 'the fortnight of the Manes'; N. of the dark half of Bhādrapada which is particularly appointed for the celebration of obsequial rites to the Manes. **-पतिः** an epithet of Yama. **-पदम्** the world of the Manes. **-पितृ** *m.* a paternal grand-father. **-पुत्रौ** (**पिता-पुत्रौ** dual) father and son. (पितुः पुत्रः means 'the son of a well-known and renowned father'). **-पूजनम्** worship of the Manes; पतिव्रता धर्मपत्नी पितृपूजनतत्परा Ms. 3. 262. **-पैतामह** *a.* (**-ही** *f.*) inherited from ancestors, ancestral, hereditary. (**-हाः** pl.) ancestors. **-प्रसूः** *f.* 1 a paternal grand-mother. -2 evening twilight; तारावलीराजतबिन्दुराजत् पितृप्रसूभासुरपत्त्रपारयः, वियद्द्विपस्तिष्ठति Rām. Ch. 6. 38. **-प्राप्त** *a.* 1 inherited from a father. -2 inherited patrimonially. **-बन्धुः** a kinsman by the father's side; they are :- पितुः पितुःस्वसुः पुत्राः पितुर्मातुःस्वसुः सुताः। पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबन्धवः॥ (**न्धुम्** *n.*) relationship by the father's side. **-भम्** The Maghā star; Śabda Ch. **-भक्त** *a.* dutifully attached to a father. **भक्तिः** *f.* filial duty. **-भोजनम्** food offered to the Manes. **-भ्रातृ** *m.* a father's brother, paternal uncle. **-मन्दिरम्** 1 a paternal mansion. -2 a cemetery. **-मेधः** a sacrifice offered to the Manes, obsequial offerings; गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन् Ms. 5. 65; Mb. 16. 7. 23. **-यज्ञः** 1 obsequial offerings. -2 offering libations of water every day to the deceased ancestors, it is one of the five daily Yajñas enjoined to be performed by a Brāhmaṇa; पितृयज्ञस्तु तर्पणम् Ms. 3. 10; also 122, 283. **-यानम्** the way of the Manes (to their world). **-राज्** *m.*, **-राजः, -राजन्** *m.* an epithet of Yama. **-रूपः** an epithet of Śiva. **-लोकः** the world of the Manes. **-वंशः** the paternal family. **-वनम्** 1 a cemetery; वसन् पितृवने रौद्रे शौचे वर्तितुमिच्छसि Mh. 12. 111. 9. -2 death, the abode of death; सर्वे पितृवनं प्राप्य स्वपन्ति विगतज्वराः Mb. 11. 3. 5. (पितृवनेचरः 1 a demon, goblin.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



-2 an epithet of Śiva ). **-वसतिः** *f.*, **-सद्मन्** *n.* a cemetery; त्रिलोकनाथः पितृसद्मगोचरः Ku. 5. 77. **-वासरपर्वन्** the period of performing the obsequious rites for the Manes; Gaṇeśa P. 2. **-व्रतः** a worshipper of the Manes. (**-तम्**) obsequial rites. **-श्राद्धम्** obsequial rites in honour of a father or deceased ancestor. **-स्वसृ** *f.* ( also पितृष्वसृ as well as पितुः स्वसृ or पितुःष्वसृ ) a father's sister; Ms. 2. 131. **-ष्वस्रीयः** a paternal aunt's son. **-संनिभः** *a.* fatherly, paternal. **-सूः** 1 a paternal grandmother. -2 evening twilight. **-स्थानः, -स्थानीयः** a guardian ( who is in the place of a father ). **-नम्** The abode of death; see पितृवन; आनिन्युः पितृस्थानाद् गुरवे गुरुदक्षिणाम् Bhāg. 10. 85. 32. **-हत्या** parricide. **-हन्** *m.* a parricide. **-हू** *m.* the right ear; पितृहूर्नृप पुर्या द्वार्दक्षिणेन पुरञ्जनः Bhāg. 4. 25. 50.

**पितृक** *a.* 1 Paternal, ancestral, hereditary. -2 Obsequial.

**पितृमत्** *a.* 1 Having a father. -2 Having an illustrious father. -3 Accompanied by or connected with the Manes. -4 Mentioning the Manes.

**पितृवत्** *a.* Having a father living. *-ind.* Like a father or the Manes.

**पितृव्यः** 1 A father's brother, paternal uncle. -2 Any elderly male relation; Ms. 2. 130. **-Comp. -पुत्रः** a father's brother's son, cousin.

**पित्तम्** Bile, one of the three humours of the body (the other two being वात and कफ) and its chief quality (heat); पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन Pt. 1. 378; पित्तमुष्णं द्रवं पीतं नीलं सत्त्वगुणोत्तरम्। सरं कटु लघु स्निग्धं तीक्ष्णमम्ले तु पाकतः ॥; मध्याह्ने च यथार्धरात्रसमये पित्तप्रकोपो भवेत् Bhāva. P. **-Comp. -अतीसारः** a bilious form of diarrhœa. **-अभिष्यन्दः** a bilious form of ophthalmia. **-अरिः** N. of several plants लाक्षा, बर्बर &c. **-उपहत** *a.* affected by bile; पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् K. P. 10. 478. **-कोशः, -षः** the gall-bladder. **-क्षोभः** excess or derangement of the bilious humour. **-गदिन्** *a.* bilious, affected by bile. **-ज्वरः, -दाहः** a bilious fever. **-द्राविन्** the sweet citron. **-धर** *a.* bilious. **-धरा** *f.* A kind of *kala* (one of the substrata of the humours) in the body; षष्ठी पित्तधरा नाम या कला परिकीर्तिता। पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्तिता; Suśruta. **-प्रकृति** *a.* of a bilious or choleric temperament. **-प्रकोपः** excess and vitiation of the bilious humour. **-भेदः** see पित्तक्षोभः; अन्नीनां पित्तभेदश्च सर्वेषामिति नः श्रुतम् Mb. 12. 283. 55. **-भेषजम्** a sort of pulse (Mar. मसूर). **-रक्तम्** plethora. **-वल्लभा** see अतिविषा. **-वायुः** flatulence caused by the excess and vitiation of the bilious humour. **-विदग्ध** *a.* impaired by bile. **-विनाशन, -शमन, -हर** *a.* antibilious.

**पित्तकः** An inferior variety of gems; Kau. A. 2.11.29.

**पित्तल** *a.* Bilious. **-लम्** 1 Brass. -2 A species of birch tree.

**पित्र्य** *a.* [ पितुरिदं प्रियं वा पितृत आगतं वा यत् ] 1 Paternal, patrimonial, ancestral. -2 (*a*) Relating or sacred to the deceased ancestors; Ms. 2. 58. (*b*) Obsequial. **-त्र्यः** 1 the eldest brother. -2 The month of Māgha. **-त्र्या** 1 The constellation called Maghā. -2 The day of full as well as new moon. **-त्र्यम्** 1 The lunar mansion called Maghā. -2 The part of the hand between the fore-finger and the thumb (sacred to the Manes). -3 The Śrāddha ritual (श्राद्धकल्प); Ch. Up. 7. 1. 2. -4 The nature of a father.

**पित्सत्** *m.* A bird.

**पित्सलः** A road, path.

**पित्सु** *a.* Being about to fly or fall.

**पिधा** 3 U. See under धा.

**पिधातव्य** *a.* To be shut, covered or closed; गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते। कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥ Ms. 2. 200.

**पिधानम्** 1 Covering, concealing. -2 A sheath. -3 A wrapper, cloak. -4 A lid or top. -5 A particular process to which quicksilver is subjected. **-नी** A cover, lid.

**पिधानकम्** 1 A sheath, scabbard. -2 A lid.

**पिधायक** *a.* Covering, hiding, concealing.

**पिहित** *p. p.* 1 Shut, closed, barred. -2 Covered, concealed, hidden. -3 Filled or covered with; see अपिहित also. **-तम्** A figure of speech which consists in insinuating to a person that one knows his secrets.

**पिनह्** 4 U. 1 To fasten, gird round, bind; आनिपिनद्धेन वल्कलेन Ś. 1; मन्दारमाला हरिणा पिनद्धा Ś. 7. 2. -2 To put on, wear; कवचं पिनह्य Bk. 3. 47. -3 To cover, envelop; कुसुममिव पिनद्धं पाण्डुपत्रोदरेण Ś. 1. 19.

**पिनद्ध** *p. p.* 1 Fastened, tied or put on; आलिङ्गन्तु गृहीतधूपसुरभीन् स्तम्भान् पिनद्धस्रजः Mu. 3. 2. -2 Dressed. -3 Hid, concealed. -4 Pierced, penetrated. -5 Wrapped, covered, enveloped.

**पिनह्य** *ind.* Having dressed.

**पिनाकः, -कम्** [ पा रक्षणे आकन् नुट् धातोरात इत्वम् Un. 4. 15. ] 1 The bow of Śiva; निपपात जवादिषुः पिनाकान् महतोऽभ्रादिव वैद्युतः कृशानुः Ki. 13. 20. -2 A trident; 'पिनाकोऽस्त्री रुद्रचापे पांशुवर्षत्रिशूलयोः' Medinī. -3 A bow in gneral. -4 A staff or stick. -5 A shower of dust. **-Comp. -गोप्तृ, -धृक्, -धृत्, -पाणि** *m.* epithets of Śiva; द्वौ वराशिश्वरौ राजन्नेकः शक्तिपिनाकधृक् Mb. 5. 155. 17; 3. 167. 5; कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिम् Ku. 3. 10.

**पिनाकिन्** *m.* An epithet of Śiva; Ku. 5. 77; मृगानुसारिणं साक्षात् पश्यामीव पिनाकिनम् Ś. 1. 6.

**पिनाकी** *f.* A variety of fiddle.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पिन्यासः** Asafœtida ( Mar. हिंग ).

**पिन्व्** 1 U. ( पिन्वति-ते ) 1 To cause to swell or overflow. -2 To wet, moisten. -3 To emit, discharge, pour forth. -4 ( Âtm. ) To swell, overflow.

**पिपतिषत्** *m.* A bird.

**पिपतिषु** *a.* Being about to fall. **-षुः** A bird.

**पिपासा** Thirst.

**पिपासित, पिपासिन्, पिपासु** *a.* Thirsty.

**पिपीतकी** The twelfth day of the light half of Vaiśākha.

**पिपीलः,-पिपीली** An ant; न चाहं कामये पापमपि कीटपिपीलयोः Mh. 5. 163. 26.

**पिपीलकः** A large black ant.

**पिपीलिकः** An ant. **-कम्** A kind of gold ( said to be collected by ants ); तद् वै पिपीलिकं नाम उद्धृतं यत् पिपीलकैः। जातरूपं द्रोणमेयमहार्षुः पुञ्जशो नृपाः॥ Mb. 2. 52. 4. **-Comp.** **-पुटम्** an ant-hill.

**पिपीलिका** A female ant; मणिमयमन्दिरमध्ये पश्यति पिपीलिका छिद्रम्. **-Comp.** **-परिसर्पणम्** the running about of ants. **-मध्य** *a.* N. of a kind of fast; cf. Kull. on Ms. 11. 216.

**पिप्पटा** ( **-डा** ) 1 A kind of sweetmeat. -2 Sugar.

**पिप्पलः** 1 The holy fig-tree ( Mar. पिंपळ ); Y. 1. 302. -2 A nipple. -3 The sleeve of a jacket or coat. -4 A bird kept free ( not confined in a cage ). **-लम्** 1 A berry in general. -2 A berry of the holy fig-tree. -3 Sensual enjoyment; Bhāg. 3. 4. 8. -4 Water. -5 The effect arising from acts ( कर्मजन्यफल ); Muṇḍa. 3. 1. 1; एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान् Bhāg. 11. 11. 6. **-Comp.** **-अद, -अशन** *a.* 1 eating the fruit of the Pippala tree. -2 given to sensual pleasures.

**पिप्पलिः, -ली** *f.* Long pepper.

**पिप्पिका** The tartar of the teeth.

**पिप्लुः** A mark, mole, freckle.

**पिब** *a.* What drinks नलच्छायपिबापि; दृष्टिः N. 6. 34; 9. 124; 16. 90.

**पियालः** N. of a tree; मृगाः प्रियालद्रुममञ्जरीणां रजःकणैर्विघ्नितदृष्टिपाताः Ku. 3. 31. **-लम्** The fruit of this tree.

**पिल्** 10 U. ( पेलयति-ते ) 1 To throw, cast. -2 To send, direct. -3 To incite, prompt.

**पिलाटम्** A part of the elephant's face. ( This is a term used by Vaijayantī while Mātaṅga L. uses 'विलागम्' ).

**पिलुः** See पीलु.

**पिल्ल** *a.* Blear-eyed. **-ल्लम्** A bleared eye.

**पिल्लका** A female elephant.

**पिश्** 6 U. ( पिंशति-ते ) To shape, fashion, form; त्वष्टा रूपाणि पिंशतु Rv. 10. 184. 1. -2 To be organised. -3 To light, irradiate. -4 To be reduced to one's constituent parts. -5 Ved. To adorn, decorate. -6 To make ready, prepare.

**पिश** *a.* 1 Free from sin. -2 Multiform.

**पिशङ्ग** *a.* [ पिंश्-अङ्गच् किच ] Reddish-brown, reddish, of a tawny colour; मध्येसमुद्रं ककुभः पिशङ्गीः Śi. 3. 33; 1. 6; Ki. 4. 36. **-ङ्गः** The tawny colour.

**पिशङ्गकः** An epithet of Viṣṇu or his attendant.

**पिशङ्गिन्** *a.* Brown, tawny.

**पिशङ्गिला** Bell-metal.

**पिशाचः** [ पिशितमाचामति, आ + चम् बा० ड पृषो० ] A fiend, goblin, devil, spirit, malevolent being; नन्वाश्वासितः पिशाचोऽपि भोजनेन V. 2; Ms. 1. 37; 12. 44. **-Comp.** **-आलयः** phosphorescence. **-चर्या** the practice of पिशाचs. **-द्रुः** a kind of tree. **-बाधा, -संचारः** demoniacal possession. **-भाषा** 'the language of devils', a gibberish or corruption of Sanskrit, one of the lowest Prākrita dialects used in plays. **-सभम्** 1 an assemblage of fiends. -2 pandemonium, the hall of their assembly.

**पिशाचकिन्** *m.* An epithet of Kubera, the god of wealth.

**पिशाचिः** Ved. = पिशाच q. v.

**पिशाचिका** 1 A she-demon, a female imp. -2 ( At the end of comp. ) Devilish or diabolical fondness for a thing; किमनया आयुधपिशाचिकया Mv. 3 'devilish fondness for fighting'; ( पिशाची is used in the same sense; तस्य खल्वियं यावज्जीवमायुधपिशाची न हृदयादपक्रामति B. R. 4; or कियच्चिरमियमतिनाटयिष्यति भवन्तमायुधपिशाची A. R. 4 ).

**पिशितम्** [ पिश्-क्त; Uṇ. 3. 95 ] 1 Flesh; कुत्रापि नापि खलु हा पिशितस्य लेशः Bv. 1. 105; R. 7. 50. -2 A small piece or part. **-Comp.** **-अशनः, -आशः, -आशिन्, -भुज्** *m.* 1 flesh-eater, a demon, goblin; ( छायाः ) संध्यापयोदकपिशाः पिशिताशनानां चरन्ति Ś. 3. 26; Mb. 3. 142. 37. -2 a man-eater, cannibal. -3 a wolf. **-पिण्डः** a piece of flesh. **-प्ररोहः** a fleshy excrescence.

**पिशुन** *a.* [ पिश्-उनच् किच; Uṇ. 3. 55 ] 1 ( *a* ) Indicating, manifesting, evincing, displaying, indicative of; शत्रूनामानिशं विनाशपिशुनः Śi. 1. 75; तुल्यानुरागपिशुनम् V. 2. 14; R. 1. 53; Amaru. 97. ( *b* ) Memorable for, commemorating; क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद् भजेथाः Me. 48. -2 Slanderous, back-biting, calumniating; पिशुनजनं खलु बिभ्रति क्षितीन्द्राः Bv. 1. 74. -3 Betraying, treacherous. -4 Harsh, cruel, unkind. -5 Wicked, malicious; malignant. -6 Low, vile, contemptible; of a wicked person; पिशुनं भोजनं भुङ्क्ते ब्रह्महत्यासमं विदुः Mb. 13. 136. 16. -7 Foolish,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



stupid. -नः 1 A slanderer, back-biter, tale-bearer, base informer, traitor, calumniator; वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरुचिः H. 1. 116; Pt. 1. 304; Ms. 3. 161; पिशुनता यद्यस्ति किं पातकैः Bh. 1. 55. -2 Cotton. -3 An epithet of Nārada. -4 A crow. -5 N. of a goblin (said to be dangerous to pregnant women). -6 N. of a writer on अर्थशास्त्र mentioned by Kautilya in connection with राजपुत्ररक्षण; Kau. A. 1. 17. -नम् 1 Betraying. -2 Saffron. -Comp. -वचनम्, -वाक्यम्, -वादः slander, detraction, calumny.

**पिशुनयति** Den. P. To indicate, show; पिशुनयति रथस्ते शीकरक्लिन्ननेमिः Ś. 7. 7.

**पिशुनित** *p. p.* Betrayed, shown.

**पिशीलम्, -लकम्** Ved. An earthen vessel.

**पिष्** I. 7 P. (पिनष्टि, पिष्ट) 1 To pound, grind, pulverize, crush; अथवा भवतः प्रवर्तना न कथं पिष्टमियं पिनष्टि नः N. 2. 61; 13. 19; माषपेषं पिपेष Mv. 6. 45; Bk. 6. 37; 12. 18; Bv. 1. 12. -2 To hurt, injure, destroy, kill (with gen.); क्रमेण पेष्टुं भुवनद्विषामसि Śi. 1. 40. -*Caus.* 1 To grind, pound. -2 To hurt, injure. -3 To give. -4 To be strong. -5 To dwell. -II. 1 P., 10 U. (पेषति, पेषयति-ते) To go, move.

**पिष्ट** *p. p.* [पिष्-क्त] 1 Ground, powdered, crushed; यत् पिपतामपि नृणां पिष्टोऽपि तनोषि परिमलैः पुष्टिम् Bv. 1. 12. -2 Rubbed together, squeezed or clasped (as the hands). -3 Kneaded. -ष्टम् 1 Anything ground, a ground substance. -2 Flour, meal; पिष्टं पिनष्टि he 'grinds flour'; *i. e.* does a useless work or a profitless repetition. -3 Lead. -Comp. -अद् *a.* eating flour. -उदकम् water mixed with flour; पिष्टोदकं सुतो यस्य पीत्वा क्षीरस्य तृष्णया Mb. 1. 131. 57. -पचनम् a pan for parching flour, a boiler &c. -पशुः an effigy of a beast made with flour. -पाकभृत् *m.* a boiler. -पाकः a quantity of baked flour. -पाचकम् a boiler. -पिण्डः a cake or a ball of flour. -पूर see घृतपूर. -पेषः,-पेषणम् 'grinding flour' *i.e.* doing any useless work or vain or profitless repetition. °न्यायः see under न्याय. -मेहः a variety of diabetes. -वर्तिः a kind of small ball made of the flour of barley, pulse or rice. -सौरभम् (pounded) sandal wood.

**पिष्टकः, -कम्** 1 A cake made of the flour of any grain. -2 A baked cake, bread. -3 A disease of the eye, opacity of the cornea. -कम् Pounded sesamum-seeds.

**पिष्टपः, -पम्** A division of the universe; cf. विष्टप.

**पिष्टातः, पिष्टातकः** Fragrant powder (पिष्टातः पटवासकः Ak.); तृष्टया पिष्टातकस्य द्युतिमिह मलये मेरुतुल्यां दधानः Nāg. 2. 13. (This powder is sprinkled over each other at Holi festival).

**पिष्टापः** Scented or perfumed powder.

**पिष्टिकम्** A cake made of rice-flour.

**पिष्टिका** Thin paste of raw rice or pulse; दालिः संस्थापिता तोये ततोऽपहृतकञ्चुका। शिलायां साधु संपिष्टा पिष्टिका कथिता बुधैः॥

**पिस्** I. 1 P. (पेसति) To go, move. -II. 10 U. (पेसयति-ते) 1 To go. -2 To be strong. -3 To dwell. -4 To hurt, injure. -5 To give or take.

**पिस्पृक्षु** *a.* 1 Wishing to touch. -2 (with जलम् or सलिलम्) Being about to rinse the mouth or to perform ablution; कदाचित् प्रातरुत्थाय पिस्पृक्षुः सलिलं शुचि Mb. 12. 228. 6.

**पिहित** See under पिधा.

**पी** 4 Ā. (पीयते) To drink; तव वदनभवामृतं निपीय Mk. 10. 13; N. 1. 1.

**पीचम्** The chin.

**पीठम्** 1 A seat (a stool, chair, bench, sofa &c.); जवेन पीठादुदतिष्ठदच्युतः Śi. 1. 12; R. 4. 84; 6. 15. -2 The seat of a religious student made of Kuśa grass. -3 The seat of a deity, an altar. -4 A pedestal in general, basis. -5 A particular posture in sitting. -6 (In geometry) The complement of a segment. -7 N. of various temples; पीठं जालंधरं नाम तिष्ठत्यत्र चतुर्मुख Yoga-śikhopaniṣad, 5. 11. -8 A royal seat, throne. -9 A district, province. -Comp. -अधिकारः appointment to an office. -केलिः a male confidant, a parasite. -ग *a.* 1 lame, crippled. -2 seated in one's seat (not a warrior); योऽपि स्यात् पीठगः कश्चित् किं पुनः समरे स्थितः Mb. 3. 22. 24 (com. पीठगः स्वासनस्थः अयुद्ध्यमानोऽपीत्यर्थः।). -गर्भः the cavity in the pedestal of an idol. -चक्रम् a carriage. -नायिका a girl of fourteen (before menstruation) who represents Durgā at the festival of that goddess. -भूः *f.* basis, basement. -मर्द *a.* very impudent. -र्दः 1 a companion, parasite, one who assists the hero of a drama in great undertakings, *e. g.* in securing his mistress; Dk. 2. 2; so पीठमर्दिका 'a lady who assists the heroine in securing her lover'; उपस्थिता पीठमर्दिकां पण्डितकौशिकीं पुरस्कृत्य देवी M. 1. 13/14. -2 a dancing master who instructs courtezans in the art of dancing. -सर्प *a.* lame, crippled; Ms. 8. 394; कर्तव्ये पुरुषव्याघ्र किमास्से पीठसर्पवत् Mb. 3. 35. 22.

**पीठकः, -कम्** A seat; हस्तिनां पीठकानां च गर्दभानां तथैव च Mb. 1. 84. 21 (com. पीठकानां राजयोग्यानां नरयानविशेषाणां 'तरवतरावा' इति म्लेच्छेषु प्रसिद्धानाम्।).

**पीठिका** 1 A seat (bench, stool). -2 A pedestal, base. -3 A section or division of a book, as the पूर्वपीठिका and उत्तरपीठिका of दशकुमारचरित.

**पीठी** A wooden seat; L. D. B.

**पीड्** 10 U. [पीडयति-ते, पीडित] 1 To pain, torment, harm, hurt, injure, harass, annoy, molest; नीलं चापीपिडच्चरैः Bk. 15. 82; Pt. 1. 343; Ms. 4. 67, 238; 7. 29.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



-2 To oppose, resist. -3 To besiege (as a city). -4 To press or squeeze together, compress, pinch; कण्ठे पीडयन् Mk. 9; लभेत सिकतासु तैलमपि यत्नतः पीडयन् Bh. 2. 5; दशनपीडिताधरा R. 19. 35. -5 To suppress, destroy; आत्मन्यन्तर्दधे भूयः कालं कालेन पीडयन् Ms. 1. 51. -6 To neglect. -7 To cover with anything inauspicious. -8 To eclipse. -9 To overpower. -10 To break, violate. -11 To take away, remove. -12 To stir, agitate. -13 To cover, wrap. -14 To leave away, give up; श्रुतिसमधिकमुच्चैः पञ्चमं पीडयन्तः Śi. 11. 1.

**पीडकः** An oppressor.

**पीडनम्** [पीड् भावे ल्युट्] 1 Paining, distressing, oppressing, inflicting pain; Ms. 9. 299; प्रजापीडनसंतापात् समुद्भूतो हुताशनः। राज्ञः श्रियं कुलं प्राणान्नादग्ध्वा विनिवर्तते॥ Pt. 1. 345; पीडनवर्गः N. of a chapter in Kau. A. (8. 4). -2 (a) Squeezing; pressing; Rām. 7. 16. 29; दोर्वल्लिबन्धनिबिडस्तनपीडनानि Gīt. 10; दन्तोष्ठपीडननखक्षतरक्तसिक्ताम् Ch. P. 44. (b) Pressure; ममातिदृढपीडनैरपि न तृप्तिरालिङ्गनैः Māl. 9. 38. -3 An instrument for pressing. -4 Taking, holding, seizing, as in करपीडन or पाणिपीडन q. v. -5 Laying waste, devastation. -6 Threshing corn. -7 An eclipse; as in ग्रहपीडन q. v. शशिदिवाकरयोर्ग्रहपीडनम् Bh. 2. 91. -8 Suppressing sounds, a fault in the pronunciation of vowels.

**पीडा** [पीड् भावे भिदा° अङ्] Pain, trouble, suffering, annoyance, molestation, agony; आश्रमपीडा R. 1. 37 'disturbance', 71; मदन°, दारिद्र्य° &c. -2 Injury, damage, harm; मूढग्राहेणात्मनो यत् पीडया क्रियते तपः Bg. 17. 19; Ms. 7. 169. -3 Devastation, laying waste. -4 Violation, infringement. -5 Restriction. -6 Pity, compassion. -7 Eclipse. -8 A chaplet, garland for the head. -9 The *Sarala* tree. -10 A basket. **-Comp. -कर** *a.* troublesome, painful. **-करणम्** torturing. **-गृहम्** house of correction. **-भाज्** *a.* showing wavy marks of pressure. **-स्थानम्** (In astrol.) inauspicious distance (of a planet).

**पीडित** *p. p.* [पीड्-क्त] 1 Pained, harassed, tormented, oppressed, pinched. -2 Squeezed, pressed; गाढालिङ्गनसङ्गपीडितमुखम् (स्तनम्) Mu. 2. 12. -3 Espoused, held, seized; न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः U. 7. 5. -4 Violated, broken. -5 Laid waste, devastated. -6 Eclipsed. -7 Bound, tied. **-तम्** 1 Paining, injuring, harassing. -2 A particular mode of sexual enjoyment. **-तम्** *ind.* Fast, closely, firmly.

**पीत** *a.* [पा-कर्मणि क्त] 1 Drunk, quaffed; वनाय पीतप्रतिबद्धवत्सां (गां मुमोच) R. 2. 1. -2 Steeped, soaked in, filled or saturated with. -3 Absorbed, drunk up, evaporated; रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी Ku. 4. 44. -4 Watered, sprinkled with water; पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या Ś. 4. 9. -5 Yellow; विद्युत्प्रभारचितपीतपटोत्तरीयः Mk. 5. 2. **-तः** 1 Yellow colour. -2 Topaz. -3 Safflower. -4 A yellow pigment prepared from cow's urine. **-तम्** 1 Gold. -2 Yellow orpiment. **-Comp. -अब्धिः** an epithet of Agastya. **-अम्बरः** 1 an epithet of Viṣṇu; इति निगदितः प्रीतः पीताम्बरोऽपि तथाऽकरोत् Gīt. 12. -2 an actor. -3 a religious mendicant wearing yellow garments. **-अरुण** *a.* yellowish-red. (**-णः**) the middle of day-break. **-अश्मन्** *m.* topaz. **-कदली** a species of banana (स्वर्णकदली). **-कन्दम्** the carrot. **-कावेरम्** 1 saffron. -2 brass. **-काष्ठम्** yellow sanders. **-कीलका** The N. of a tree (senna). **-कुष्ठः** yellow leprosy; भागिनीगमने चैव पीतकुष्ठः प्रजायते। **-कोशः** *a.* one who has ratified a treaty by drinking from a cup; Raja. T. **-गन्धम्** yellow sandal. **-चन्दनम्** 1 a species of sandal-wood. -2 saffron. -3 turmeric. **-चम्पकः** a lamp. **-तुण्डः** a Kāraṇḍava bird. **-दारु** *n.* a kind of pine or *Sarala* tree. **-दुग्धा** 1 a milch cow. -2 a cow whose milk has been pledged. -3 a cow tied up to be milked. **-द्रुः** the *Sarala* tree. **-निद्र** *a.* immersed in slumber. **-नील** *a.* green. (**-लः**) the green colour. **-पादा** a kind of bird (Mar. मैना). **-पुष्पः** N. of several plants, चम्पक, कर्णिकार &c. **-मणिः** a topaz. **-माक्षिकम्** a kind of mineral substance. **-मारुतः** a kind of snake. **-मूलकम्** the carrot. **-यूथी** yellow jasmine. **-रक्त** *a.* yellowish-red, orange-coloured. (**-क्तम्**) a kind of yellow gem, the topaz. **-रागः** 1 the yellow colour. -2 wax. -3 the fibres of a lotus. **-लोहम्** brass. **-वालुका** turmeric. **-वासस्** *m.* an epithet of Kriṣṇa or an Avatāra of Viṣṇu; ... पद्माक्षं पीतवाससं स्तुवन्ति नामभिर्दिव्यैः न ते संसारिणो नराः Rāmarakṣā 25. **-शोणित** *a.* bloody (a sword). **-सारः** 1 the topaz. -2 the sandal tree. (**-रम्**) yellow sandal-wood. **-सारि** *n.* antimony. **-स्कन्धः** a hog. **-स्फटिकः** the topaz. **-स्फोटः** the itch or scab. **-हरित** *a.* yellowish-green.

**पीतक** *a.* Yellow. **-कः** The Aśoka tree. **-कम्** 1 Yellow orpiment. -2 Brass. -3 Saffron. -4 Honey. -5 Aloe-wood. -6 Sandal-wood. -7 Yellow sandal.

**पीतनः** 1 A species of fig-tree (waved-leaf). -2 The hog-plum tree. **-नम्** 1 Yellow orpiment -2 Saffron. -3 The *Sarala* tree.

**पीतल** *a.* Yellow. **-लः** The yellow colour. **-लम्** Brass.

**पीतलकम्** Brass.

**पीतिः** A horse. *-f.* 1 Draught, drinking. -2 A tavern. -3 The proboscis of an elephant. -4 Going. -5 Protection (Ved).

**पीतिन्** *m.* A horse.

**पीतिका** 1 Saffron. -2 Turmeric. -3 Yellow jasmine.

**पीतुः** 1 The sun. -2 Fire -3 The chief elephant of a herd.

**पीथः** 1 The sun. -2 Time. -3 Fire. -4 Protection. -5 Drink; यस्याध्वरे भगवानध्वरात्मा मघोनि माद्यत्युरुसोमपीथे Bhāg. 5. 15. 12. **-थम्** 1 Water. -2 Ghee.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पीथिः** A horse.

**पीन** *a.* [ प्याय्-क्त-संप्रसारणे दीर्घः ] 1 Fat, fleshy, corpulent, U. 6. 13; 'strong'. -2 Plump, large, thick; as in पीनस्तनी. -3 Full, round. -4 Swollen, large, big. -5 Brawny. -6 Profuse, excessive. **-Comp. -ऊधस्** *f.* (पीनोध्नी) a cow with full udders. **-वक्षस्** *a.* full-chested, having a full bosom.

**पीनसः** 1 Cold affecting the nose. -2 Cough, catarrh.

**पीयुः** 1 A crow -2 The sun. -3 Fire. -4 An owl. -5 Time. -6 Gold.

**पीयूषः, -षम्** [ पीय्-ऊषन्, Un. 4. 76 ] 1 Nectar, ambrosia; मनसि वचसि काये पुण्यपीयूषपूर्णाः Bh. 2. 78; इमां पीयूषलहरीम् G. L. 53. -2 Milk in general. -3 The milk of a cow during the first seven days after calving. -4 The first milk given by a cow after calving. **-Comp. -धामन्** *m.* the moon. **-भानुः** the moon; तत् सर्वं जयति प्रसादमहिमा पीयूषभानोरयम् Cholachampūkāvyam 5. 63. **-महस्** *m.*, **-रुचिः** 1 the moon. -2 camphor. **-वर्षः** 1 a shower of nectar. -2 the moon. -3 camphor.

**पील्** 1 P. (पीलति) 1 To check, obstruct, hinder. -2 To stop. -3 To become stupid.

**पीलकः** The large black ant.

**पीलुः** [ पील्-उ ] 1 An arrow. -2 An atom; प्रत्यक्षं न पुनाति नापहरते पापानि पीलुच्छटा Viś. Guṇa. 552. -3 An insect. -4 An elephant. -5 The stem of the palm. -6 A flower. -7 A group of palm trees; Mb. 7. 178. 24. -8 A kind of tree. -9 A heap of bones. -10 The central part of the hand. **-लु** *n.* The fruit of the Pīlu tree. **-Comp. -पत्रः** the Mūrvā plant. **-पर्णी** 1 a kind of drug. -2 N. of two plants. **-पाकवादिन्** *m.* a Vaiśeṣika. (One who maintains the doctrine that heat acts only onthe atoms of matter, as of a jar, and not on the whole body.)

**पीलुकः** An ant.

**पीलुनी** Sanseviara Roxburghiana (Mar. मोरवेल).

**पीव्** 1 P. (पीवति) To be fat or corpulent.

**पीव, पीवर, पीवस** *a.* Fat, corpulent.

**पीवन्,** *a.* (**पीवरी** *f.*) [ प्यै-कनिप् संप्र० दीर्घः ] 1 Full, fat, large; बिभर्षि कायं पीवानं सौद्यमो भोगवान् यथा Bhā. 7. 13. 16. -2 Stout, strong. *-m.* Wind.

**पीवर** *a.* (**-रा, -री** *f.*) [ प्यै-ष्वरच् संप्र० दीर्घः ] 1 Fat, large, stout, fleshy, corpulent; नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयम् R. 3. 8; 5. 65; 19. 32. -2 Plump, thick. **-रः** A tortoise. **-री** 1 A young woman. -2 A cow. **-Comp. -स्तनी** 1 a woman with fat or large breasts. -2 a cow with a large udder.

**पीवा** Water.

**पुंस्** 10 U. [ पुंसयति-ते ] 1 To crush, grind. -2 To pain, trouble, punish.

**पुंस्** *m.* [ पाति पा-पालने डुमसुन् Uṇ. 4. 177 ] (Nom. पुमान्, पुमांसौ, पुमांसः; Instr. du. पुंभ्यां; Voc. sing. पुमन्) 1 A male, male being; पुंसि विश्वसिति कुत्र कुमारी N. 5. 110. -2 A man, human being; यस्यार्थाः स पुमाँल्लोके H. 1. -3 Man, mankind, people; वन्द्यैः पुंसां रघुपतिपदैः Me. 12. -4 A servant, an attendant. -5 A word in the masculine gender. -6 The masculine gender; पुंसि वा हरिचन्दनम् Ak. -7 The soul. -8 A living being; जन्म त्वात्मतया पुंसः सर्वभावेन भूरिदः Bhāg. 11. 22. 40. -9 A kind of Naraka; अपत्यमस्मि ते पुंसस्त्राणात् पुत्र इति स्मृतः Mb. 14. 90. 63. **-Comp. -अनुज** *a.* (पुंसानुज) having an elder brother. **-अनुजा (पुमनुजा)** a girl born after the male child; *i. e.* a girl having an elder brother. **-अपत्यम् (पुमपत्यम्)** a male child. **-अर्थः (पुमर्थः)** 1 the aim of man. -2 any one of the four ends of human existence; *i. e.* धर्म, अर्थ, काम and मोक्ष; see पुरुषार्थ. **-आख्या (पुमाख्या)** a designation of a male being. **-आचारः (पुमाचारः)** a usage of men. **-कटिः** *f.* a man's hip. **-कामा** a woman wishing for a husband; P. VIII. 3. 6. Kāśi. **-कोकिलः** a male cuckoo; चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज Ku. 3. 32. **-खेटः (पुंखेटः)** a male plant. **-गवः (पुंगवः)** 1 a bull, an ox. -2 (at the end of comp.) chief, best, most excellent, distinguished or pre-eminent of any class; वाल्मीकिर्मुनिपुंगवः Rām.; so गजपुंगवः Bh. 2. 31, नरपुंगवः &c. °**केतुः** an epithet of Śiva; स्विन्नाङ्गुलिः पुंगवकेतुरासीत् Ku. 7. 77. **-चलः (पुंश्चलः)** an adulterer. **-चली (पुंश्चली)** a harlot, an unchaste woman; Y. 1. 162. Ms. 4. 220; अहो को वेद भुवने दुर्ज्ञेयं पुंश्चलीमनः । पुंश्चल्यां यो हि विश्वस्तो विधिना स विडम्बितः ॥ Brav. P. **-चलीयः (पुंश्चलीयः)** the son of a harlot. **-चलू** *f.* **(पुंश्चलू)** Ved. a harlot. **-चिह्नम् (पुंश्चिह्नम्)** the characteristic of a male, the membrum virile. **-जन्मन् (पुंजन्मन्)** *n.* the birth of a male child. °**करः**, °**दः**, °**योगः** a constellation under which male children are born. **-दासः (पुंदासः)** a male slave. **-ध्वजः (पुंध्वजः)** 1 the male of any species of animal. -2 a mouse **-नक्षत्रम् (पुंनक्षत्रम्)** a male asterism. -2 an asterism under which male children are born. **-नागः (पुंनागः)** 1 'an elephant among men', a distinguished man. -2 a white elephant. -3 a white lotus. -4 nutmeg. -5 N. of a tree called नागकेशर; R. 4. 57. -6 N. of a tree (Mar. उंडीण); Mb. 1. 63. 43; Bhāg. 8. 2. 18. **-नाटः, -डः (पुंनाटः, -डः)** N. of a tree. **-नामधेयः (पुंनामधेयः)** a male. **-नामन् (पुंनामन्)** *a.* holding a masculine name. (*-m.*) 1 the tree called पुंनाग. **-पुत्रः** a male child; P. VIII. 3. 6. Kāśi. **-प्रजननम्** the male organ of generation. **-भावः (पुंभावः)** manhood, masculine gender. **-भूमन् (पुंभूमन्)** *m.* a word of the masculine gender used only in the plural number; दाराः पुंभूम्नि चाक्षताः Ak. **-योगः (पुंयोगः)** 1 cohabitation with or relation to a man; P. IV. 1. 48. -2 reference to a male or husband; पुंयोगे क्षत्रियी. **-रत्नम्**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(**पुंरत्नम्**) an excellent man. **-राशिः** (**पुंराशिः**) a male sign of the zodiac. **-रूपम्** (**पुंरूपम्**) the form of a man. **-लक्षणम्** manliness. **-लिङ्ग** *a.* (**पुंलिङ्ग**) of the masculine gender, masculine. (**-ङ्गम्**) 1 masculine gender. -2 virility, manhood. -3 the male organ. **-वत्सः** (**पुंवत्सः**) a bull-calf. **-वृषः** (**पुंवृषः**) the musk-rat. **-वेष** *a.* (**पुंवेष**) dressed like a male, clad in male attire. **-सवन** (**पुंसवन**) *n.* causing the birth of a male child. (**-नम्**) the first of the purificatory Saṁskāras : it is a ceremony performed on woman's perceiving the first signs of a living conception, with a view to the birth of a son; यथाक्रमं पुंसवनादिकाः क्रियाः (व्यधत्त) R. 3. 10. -2 fœtus; यस्मिन् प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवन्ति पतन्ति च Bhāg. 5. 24. 15. -3 the time after a woman's courses; तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः, उपचक्राम भर्तारम् Mb. 1. 31. 25. -4 milk.

**पुंसी** A cow which has a bull-calf.

**पुंस्त्वम्** 1 The characteristic of a male, virility, potency, masculineness; यत्नात् पुंस्त्वे परीक्षितः Y. 1. 55; कुलालपितृत्वं च कुलालजनकपुंस्त्वम् Tarka K. -2 Semen virile. -3 The masculine gender.

**पुंवत्** *ind.* 1 Like a man; पुंवत् प्रगल्भा R. 6. 20. -2 In the masculine gender.

**पुक्कश** *a.* (**-शी** *f.*), **पुक्कस** *a.* (**-सी** *f.*) Low, vile. **-शः**, **-षः**, **-सः** N. of a degraded mixed caste, the offspring of a Niṣāda by a Śūdra woman; जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः Ms. 10. 18. **-शी, -सी** 1 A bud. -2 The Indigo plant. -3 A woman of the Pukkasa caste.

**पुक्कशक** *a.* Low, vile. **-कः** A man of the Pukkasa tribe.

**पुंखः, -खम्** [ पुमांसं खनति, खन्-ड ] 1 The feathered part of an arrow; सक्ताङ्गुलिः सायकपुङ्ख एव R. 2. 31; 3. 64; 9. 61. -2 A falcon, heron. -3 An auspicious ceremony; L. D. B.

**पुंखित** *a.* Furnished with feathers (as an arrow).

**पुङ्गः, -ङ्गम्** A heap, collection, multitude.

**पुंगलः** The soul.

**पुच्चुकः** An elephant in the second year; Mātaṅga L. 5. 3.

**पुच्छ्** 1 P. To err, to go astray; L. D. B.

**पुच्छः, -च्छम्** 1 A tail in general; पश्चात् पुच्छं वहति विपुलम् U. 4. 27. -2 A hairy tail. -3 A peacock's tail. -4 The hinder part. -5 The end of anything. **-Comp. -अग्रम्**; **-मूलम्** the tip of the tail. **-कण्टकः** a scorpion. **-जाहम्** the root of the tail.

**पुच्छिन्** *a.* Having a tail. *-m.* 1 A cock. -2 The *Arka* plant.

**पुच्छटिः, -टी** *f.* Cracking the fingers (छोटिका).

**पुञ्जः** A heap, multitude, quantity, mass, collection; क्षीरोदवेलेव सफेनपुञ्जा Ku. 7. 26; प्रत्युद्गच्छति मूर्च्छति स्थिरतमः पुञ्जे निकुञ्जे प्रियः Gīt. 11.

**पुञ्जयति** Den. P., पुञ्जीकृ 8 U. To heap, collect together.

**पुञ्जिः** *f.* A heap, quantity, mass. **-Comp. -ष्ठः** *a.* heaped. (**-ष्ठः**) Ved. 1 a fisherman. -2 a bird-catcher.

**पुञ्जिकः** Hail.

**पुञ्जिकास्तना** *f.* N. of a celestial nymph; Mārk. P.

**पुञ्जित** *a.* 1 Heaped, collected, heaped together; U. 5. 14. -2 Pressed together.

**पुट्** I. 6 P. (पुटति) 1 To embrace, clasp. -2 To intertwine. -II. 10 U. (पुटयति-ते) 1 To be in contact with. -2 To bind together, fasten. -3 (पोटयति-ते) (*a*) To grind, reduce to powder. (*b*) To speak. (*c*) To shine. -III. 1 P. (पोटति) 1 To grind. -2 To rub.

**पुटः, -टम्** [ पुट्-क ] 1 A fold. -2 A hollow space, cavity, concavity; भिन्नपल्लवपुटो वनानिलः R. 9. 68; 11. 23; 17. 12; M. 3. 9; अञ्जलिपुट, नासापुट, कर्णपुट &c. -3 A cup made of a leaf folded or doubled; a vessel of leaves; दुग्ध्वा पयः पत्रपुटे मदीयम् R. 2. 65; Ms. 6. 28. -4 Any shallow receptacle. -5 The pod or capsule which envelops young shoots. -6 A sheath, cover, covering -7 An eye-lid (पुटी also in all these senses). -8 A horse's hoof. -9 A cloth worn to cover the privities. **-टः** 1 A casket. -2 The contracting of anything. -3 A folding of anything so as to form a cup. **-टम्** 1 A nutmeg. -2 Two vessels joined together for medical purposes. **-Comp. -अञ्जलिः** the two hollowed hands put together; श्रीकृष्णपुरतः स्थित्वा तुष्टाव तं पुटाञ्जलिः Brav. P. 3. 9, 23. **-उटजम्** a white umbrella. **-उदकः** a cocoa-nut. **-ग्रीवः** 1 a pot, jar, pitcher. -2 a copper-vessel. **-धेनुः** a not yet full-grown cow with a calf. **-पाकः** 1 a particular method of preparing drugs, in which the various ingredients are wrapped up in leaves, and being covered with clay are roasted in the fire; अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः । पुटपाकप्रतीकाशो रामस्य करुणो रसः U. 3. 1. -2 digesting. -3 subliming. **-भेदः** 1 a town, city. -2 a kind of musical instrument (आतोद्य). -3 'parting of the eyelids', opening; पुटभेदो ललाटस्थनीललोहितचक्षुषः U. 6. 3. -4 a whirl-pool or eddy. **-भेदनम्** a town, city; स हस्तिनपुरे रम्ये कुरूणां पुटभेदने (वसन्) Mb. 1. 100. 12; पुटभेदनं दनुसुतारिरैक्षत Śi. 13. 26.

**पुटकम्** 1 A fold; रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः Bh. 1. 95. -2 Any shallow cup or cavity. -3 A vessel made of a leaf. -4 A lotus. -5 Nutmeg.

**पुटकिनी** 1 A lotus. -2 A group of lotuses.

**पुटनम्** Enveloping, wrapping.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पुटिका** Cardamoms.

**पुटित** *a.* 1 Rubbed, ground. -2 Contracted. -3 Stitched, sewn. -4 Split. **-तम्** The hollow of the hands.

**पुटी** A small piece of cloth worn over the privities; (for other senses see पुट).

**पुटीकृ** To make into a funnel-shaped vessel; B. R.

**पुट्ट्** 10 U. (पुट्टयति-ते) 1 To become small, decrease, diminish. -2 To be low or shallow. -3 To disregard, disrespect.

**पुड्** 6 P. 1 To leave, quit, abandon. -2 To dismiss. -3 To emit, send forth. -4 To discover.

**पुण्** 6 P. (पुणति) To be virtuous or holy, act in a virtuous manner.

**पुण्ट्** 10 U. (पुण्टयति-ते) 1 To shine. -2 To speak.

**पुण्ड्** 1 P. (पुण्डति) To grind, reduce to powder, pound.

**पुण्डः** A sign, mark.

**पुण्डरीकम्** 1 A lotus-flower, especially a white lotus; Nelumbium Speciosum; हृत्पुण्डरीकान्तरसंनिविष्टं स्वतेजसा व्याप्तनभोऽवकाशम् Sivakavacha; U. 6. 12, 29; Mal. 9. 14. -2 A white parasol. -3 A medicine, drug. **-कः** 1 The white colour. -2 N. of the elephant presiding over the south-east direction; तेन द्विपानामिव पुण्डरीको राज्ञामजय्योऽजनि पुण्डरीकः R. 18. 8. -3 A tiger. -4 A kind of serpent. -5 A species of rice. -6 A kind of leprosy. -7 A fever in an elephant. -8 A kind of mango tree. -9 A pitcher, water-pot. -10 Fire. -11 A (sectarial) mark on the fore-head. -12 A kind of sacrifice; पुण्डरीकसहस्रेण वाजपेयशतैस्तथा Mb. 7. 63. 2. -13 N. of an ancient and renowned devotee of the god Vithobā. **-Comp.** **-अक्षः** an epithet of Viṣṇu; यं पुण्डरीकाक्षमिव श्रिता श्रीः R. 18. 8. **-प्लवः** a kind of bird. **-मुखी** a kind of leech.

**पुंडरीयकम्** 1 Land lotus. -2 A kind of plant (= पुण्डर्यम्).

**पुण्डर्यम्** 1 A plant, creeper. -2 A kind of medicinal plant (used as a remedy for diseased eyes).

**पुंड्रः** [पुण्ड्-भेदने रक् Uṇ 2. 13] 1 A kind of sugar-cane (red variety). -2 A lotus in general. -3 A white lotus -4 A mark or line (on the fore-head) made with sandal &c., sectarial mark; उत्थं तत् पुण्ड्रमूर्ध्वं जनिमरणतमःखण्डनं मण्डनं च Viṣṇupād Stotra 43. -5 A worm. -6 The *Atimukta* creeper. **-ण्ड्राः** (pl.) N. of a country and its inhabitants. **-Comp.** **-केलिः** an elephant.

**पुंड्रकः** 1 A variety of sugar-cane (red-variety); (Mar. पुंड्या ऊंस); कुष्टे रोहति दोहदेन पयसां पिण्डेन चेत् पुण्ड्रकः N. 21. 153. -2 A sectarial mark. -3 One who lives by breeding silk-worms.

**पुण्य** *a.* [Uṇ. 5. 15] 1 Holy, sacred, pure; जनकतनयास्नानपुण्योदकेषु आश्रमेषु Me. 1; पुण्यं याम चण्डीश्वरस्य Me. 35; पुण्यानि हि नामग्रहणान्यपि महामुनीनां किं पुनर्दर्शनानि K. 41; Ś. 2. 14; Ms. 2. 68. -2 Good, meritorious, virtuous, righteous, just. -3 Auspicious, propitious, lucky, favourable (as a day); Ms. 2. 26, 30. -4 Agreeable, pleasing, lovely, beautiful; प्रकृत्या पुण्यलक्ष्मीकौ Mv. 1. 16, 24; U. 4. 19; Ku. 5. 73; so पुण्यदर्शनः &c. -5 Sweet, fragrant (as odour). -6 Solemn, festive. **-ण्यम्** 1 Virtue, religious or moral merit; अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते H. 1. 80; महतः पुण्यपण्येन क्रीतेयं कायनौस्त्वया Śānti. 3. 1; R. 1. 69; N. 3. 87. -2 A virtuous or meritorious act, good or virtuous works. -3 Purity, purification. -4 A trough for watering cattle. -5 A religious ceremony, especially one performed by a wife to retain her husband's affection and to obtain a son. -6 (Astrol.) the seventh mansion from जन्मलग्न. -7 the union of मेष, कर्क, तुला and मकर. **-ण्या** 1 The holy basil. -2 The Ganges. **-Comp.** **-अनुभावः** pleasing majesty or dignity; U. 4. 22. **-अहम्** (for अहन्) a happy or auspicious day; पुण्याहं भवन्तो ब्रुवन्तु। अस्तु पुण्याहम्; पुण्याहं व्रज मङ्गलं सुदिवसं प्रातः प्रयातस्य ते Amaru. 61. °वाचन repeating 'this is an auspicious day' three times at the commencement of most religious ceremonies. **-आत्मन्** *a.* pious, righteous. **-उदयः** the dawn or resulting of good fortune. **-उद्यान** *a.* having lovely gardens. **-कर्तृ** *m.* a meritorious or virtuous man. **-कर्मन्** *a.* doing meritorious acts, upright, righteous. (-*n.*) a meritorious act. **-कालः** an auspicious time. **-कीर्तनः, -श्रवणः** N. of Viṣṇu. (**-नम्**) narrating or reading Purāṇas. **-कीर्ति** *a.* bearing a good or holy name, of auspicious fame, celebrated; स पुण्यकीर्तिः शतमन्युकल्पो महेन्द्रलोकप्रतिमां समृद्ध्या (अध्यास्त) Bk. 1. 5. **-कृत्** *a.* virtuous, meritorious. **-कृत्यम्** a meritorious work. **-क्षेत्रम्** 1 a holy place, place of pilgrimage; अन्यक्षेत्रे कृतं पापं पुण्यक्षेत्रे विनश्यति। पुण्यक्षेत्रे कृतं पापं वज्रलेपो भविष्यति॥ Subhāṣ. -2 'The holy land', N. of Āryāvarta. **-गन्ध** *a.* sweet-scented. (**-न्धः**) the Champaka tree. **-गन्धि** *a.* fragrant. **-गृह** 1 an alms-house. -2 a temple; उद्यानानि च रम्याणि हृष्टाः पुण्यगृहाणि च Rām. 2. 67. 12 (com. पुण्यगृहाणि पुण्यसंपादकगृहाणि विप्रादयानि). **-जनः** 1 a virtuous man. -2 a demon, goblin; वियति प्रसमीक्ष्य कालमेघप्रतिमं पुण्यजनौघमुत्तदन्तम् Rām. Ch. 2. 56. -3 a Yakṣa; Bhāg. 4. 10. 3; पयोधरैः पुण्यजनाङ्गनानाम् R. 13. 60. °ईश्वरः an epithet of Kubera; अनुययौ यमपुण्यजनेश्वरौ R. 9. 6. **-जित** *a.* won by merit or good works. **-तीर्थम्** a holy place of pilgrimage. **-दर्शन** *a.* 1 beautiful. -2 of sacred appearance; तां पुण्यदर्शनां दृष्ट्वा R. 1. 86. (**-नः**) the blue jay. (**-नम्**) visiting holy shrines. **-दुह्** *a.* granting happiness or beatitude. **-निवह** *a.* meritorious. **-पुरुषः** a man rich in moral merit, a pious man. **-प्रतापः** the efficacy of virtue or

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



moral merit. **-फलम्** the reward of good works; यत् पुण्यफलमाप्नोति गां दत्त्वा विधिवद् गुरोः। तत् पुण्यफलमाप्नोति भिक्षां दत्त्वा द्विजो गृही॥ Ms. 3. 95. (**-लः**) a grove. **-भाज्** *a.* blessed, virtuous, meritorious; पुण्यभाजः खल्वमी मुनयः K. 43. **-भूः -भूमिः** *f.* 1 'the holy land', *i. e.* Āryāvarta. -2 The son-bearing mother. **-योगः** the result of virtuous deeds done in a former life. **-रात्रः** 1 an auspicious night. -2 a night on which any religious ceremony is held. **-लक्ष्मीक** *a.* auspicious, prosperous; प्रकृत्या पुण्यलक्ष्मीकौ कावेतौ ज्ञायते त्विदम् Mv. 1. 16. **-लोकः** heaven, paradise. **-शकुनम्** an auspicious omen. (**-नः**) a bird of good omen. **-शाला** alms-house. **-शील** *a.* of a virtuous disposition, inclined to pious acts, virtuous, pious, righteous. **-श्लोक** *a.* 'well-spoken of', or 'auspicious to repeat or utter the name of', of good fame; Dk. 2. 8. (**-कः**) an epithet of Nala (of Niṣadha); Yudhiṣṭhira and Janārdana; पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः। पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः॥. (**-का**) an epithet of Sītā and Draupadī. **-संचयः** a store of virtue or religious merit. **-स्थानम्** a sacred or holy place, a place of pilgrimage.

**पुण्यकम्** 1 A religious or virtuous act (such as fasting &c.). -2 A religious rite or ceremony, a festival &c. -3 = पुण्यम् 5; Mb. 1. 3. 97. **-कः** N. of Viṣṇu. **-Comp. -व्रतम्** the worship of Kriṣṇa for a year, performed by a woman desirous of a son.

**पुण्यवत्** *a.* Meritorious, virtuous. -2 Lucky, auspicious, fortunate. -3 Happy, blessed. -4 Pleasing, beautiful.

**पुत्** *n.* A particular division of Hell or the infernal regions to which childless persons are said to be condemned; see पुत्र below. **-Comp. -नामन्** *a.* (hell) called पुत्; पुन्नाम्नो नरकाद् यस्मात् त्रायते पितरं सुतः। तस्मात् पुत्र इति प्रोक्तः ......Ms. 9. 138; Mb. 1. 74. 39.

**पुत्तलः, -ली** 1 An image, idol, a statue, effigy. -2 A doll, puppet. **-Comp. -दहनम्, -विधिः** burning an effigy in place of the body of one who has died abroad or whose corpse is lost. **-पूजा** idolatry.

**पुत्तलकः, पुत्तलिका** A doll &c.

**पुत्तिका** 1 A small kind of bee; पुत्तिका इव धान्येषु पुत्तिका इव पक्षिषु। तद्विधास्ते मनुष्याणां येषां धर्मो न कारणम्॥ Mb. 12. 181. 7. -2 The white ant. -3 A doll.

**पुत्रः** 1 A son; (the word is thus derived :— पुन्नाम्नो नरकाद् यस्मात् त्रायते पितरं सुतः। तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा॥ Ms. 9. 138; the word, therefore, should be strictly written पुत्त्रः). -2 A child, young one of an animal. -3 A dear child (a term of endearment in addressing young persons). -4 (At the end of comp.) Anything little or small of its kind; as in असिपुत्रः, शिलापुत्रः &c. -5 (Astrol.) The fifth mansion from janmalagna. **-त्रौ** (du.) A son and daughter. **-Comp. -अन्नादः** 1 one who lives at a son's expense, one who is maintained by his son. -2 a mendicant of a particular order; see कुटीचक. **-अर्थिन्** *a.* wishing for a son. **-आचार्य** *a.* one having a son for his teacher; Ms. 3. 160. **--आदिनी** 1 an unnatural mother. -2 a tigress. **-इष्टिः, -इष्टिका** *f.* a sacrifice performed to obtain male issue; गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत्. **-ऐश्वर्यम्** a resignation of property or power by a father to his son. **-कर्मन्** *n.* a ceremony on the birth of a son. **-काम** *a.* desirous of sons. **-काम्या** a wish for sons; अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया R. 1. 35. **-कार्यम्** a ceremony relating to a son. **-कृत्** *m.* an adopted son. **-कृतकः** one who is adopted as a son, an adopted son; श्यामाकमुष्टिपरिवर्धितको जहाति सोऽयं न पुत्रकृतकः पदवीं मृगस्ते Ś. 4. 14. **-जग्धी** an unnatural mother (who eats her own children.) **-जात** *a.* one to whom a son is born. **-दारम्** son and wife. **-धर्मः** filial duty. **-पौत्रम्, -त्राः** sons and grandsons. **-पौत्रीण** *a.* transmitted from son to son, hereditary; लक्ष्मीं परंपरीणां त्वं पुत्रपौत्रीणतां नय Bk. 5. 15. **-प्रतिनिधिः** a substitute for a son (*e. g.* an adopted son). **-प्रवरः** the eldest son. **-लाभः** obtaining a son. **-वधूः** *f.* a daughter-in-law. **-सखः** 'a friend of children', one who is fond of children. **-सूः** a mother of a son. **-हीन** *a.* sonless, childless. **-संकरिन्** *a.* mixing or confusing sons by mixed marriages. **-हतः** an epithet of Vasiṣṭha (whose hundred sons were killed). (**-ती**) an unnatural mother.

**पुत्रकः** [पुत्र अनुकम्पायां संज्ञायां वा कन् स्वार्थे क वा] 1 A little son or boy, boy, chap, lad (often used as a term of endearment); हा हा पुत्रक नाधीतं सुगतैतासु रात्रिषु. -2 A doll, puppet; सा कन्दुकैः कृत्रिमपुत्रकैश्च रेमे Ku. 1. 29. -3 A rogue, cheat. -4 A locust, grass-hopper. -5 A fabulous animal with eight feet (शरभ). -6 Hair. -7 A pitiable person.

**पुत्रका, -पुत्रिका** 1 A daughter. -2 A doll, puppet. -3 A daughter appointed to raise male issue for a father who has no sons; अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम्। यदपत्यं भवेदस्यां तन्मम स्यात् स्वधाकरम्॥ Ms. 9. 127. -4 The cotton or down of the tamarisk. -5 A small statue; तद्धाम्नाऽभूदजस्तूष्णीं पूर्देव्यन्तीव पुत्रिका Bhāg. 10. 13. 56. -6 (At the end of comp.) Anything little or small of its kind; as in असिपुत्रिका, खड्गपुत्रिका &c. **-Comp. -धर्मः** bestowing a daughter in marriage so as to raise issue for her father (see पुत्रिका 3); आकूतिं रुचये प्रादादपि भ्रातृमतीं नृपः। पुत्रिकाधर्ममाश्रित्य Bhāg. 4. 1. 2. See next word. **-पुत्रः, -सुतः** 1 a daughter's son who by agreement becomes the son of her father; see Ms. 9. 127; अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्। अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति॥ Vasiṣṭhasmṛiti. -2 a daughter who, being regarded as a son, returns to her father's house; (पुत्रिकैव पुत्रः; अथवा पुत्रिकैव सुतः पुत्रिकासुतः सोऽप्यौरससम एव Mitā. on Y. 2. 128). -3 a grandson **-प्रसूः** a mother

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



of daughters. **-भर्तृ** *m.* 'a daughter's husband', a son-in-law.

**पुत्रंचारिन** N. of some plant; Mātaṅga L. 10. 10.

**पुत्रंजीवः, -वकः** N. of a plant (from its seeds or flowers are made garlands and worn to keep children in good health).

**पुत्रिन्** *a.* (**-णी** *f.*) Having a son or sons; अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् R. 1. 91; V. 5. 14. *-m.* The father of a son. **-णी 1** The mother of a son. **-2** A parasitical plant.

**पुत्रिय, पुत्रीय, पुत्र्य** *a.* Relating to a son, filial.

**पुत्री 1** A daughter. **-2** N. of Durgā; see पुत्रिका also.

**पुत्रीकृ** 8 U. To adopt as a son; अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन R. 2. 36.

**पुत्रीय** *a.* Relating to a son; ततः प्राक्रमदिष्टिं तां पुत्रीयां पुत्रकारणात् Rām. 1. 15. 3.

**पुत्रीयति** Den. P. **1** To wish for a son. **-2** To treat like a son.

**पुत्रीया** The desire of a son.

**पुथ्** I. 4 P. (पुथ्यति) To injure, hurt. *-Caus.* **1** To destroy completely, annihilate. **-2** To overpower, drown (as a sound). **-3** To speak. **-4** To shine. -II. 10 U. (पोथयति-ते) To shine.

**पोथित** *p. p.* Hurt, killed, destroyed.

**पुद्गल** *a.* Beautiful, lovely, handsome. **-लः 1** Atom (परमाणुः) पुद्गलाः परमाणवः Śrīdhara. **-2** The body, matter; A. Rām. 3. 2. 28. **-3** The soul. **-4** The Ego or individual. **-5** Man. **-6** An epithet of Śiva.

**पुन्थ्** 1 P. **1** To kill, to hurt. **-2** To suffer; L. D. B.

**भ्रू** *f.* [भ्रम्-डू Uṇ. 2. 68] Brow, eyebrow; कान्तिर्भ्रुवोरायतलेखयोर्या Ku. 1. 47; विवर्तितभ्रूरियमद्य शिक्षते. -**Comp.** -**कुटिः, -टी** *f.* contraction or knitting of the eyebrows, a frown. °बन्धः, °रचना bending or knitting the eyebrows; °मुखम् a frowning face; भ्रुकुटिं बन्धू or रच् 'to knit the eyebrows, to frown'. -**क्षेपः** contraction of the eyebrows; भ्रूक्षेपमात्रानुमतप्रवेशाम् Ku. 3. 60. °आलापः the language of frowns. -**जाहम्** the root of the eyebrow. -**भङ्गः, -भेदः** contraction or knitting of the eyebrows, a frown; तरङ्गभ्रूभङ्गा क्षुभितविहगश्रेणिरशना V. 4. 28; सभ्रूभङ्गं मुखमिव Me. 24; सभ्रूभङ्गम् 'with a frown'. -**भेदिन्** *a.* frowning. -**मण्डलम्** the arch of the eyebrow. -**मध्यम्** the space between the eye-brows. -**लता** a creeper-like eyebrow, an arched or curving eyebrow. -**वञ्चितम्** a stolen glance. -**विकारः, -विक्रिया, -विक्षेपः** contraction of the eyebrows, frowning. -**विचेष्टितम्, -विभ्रमः, -विलासः** graceful or playful movement of the eyebrows, amorous play of the brows; सभ्रूविलासमथ सोऽयमितीरयित्वा Māl. 1. 25; Me. 16. -**विजृम्भः, -भ्रमणम्** the bending of the brows.

**भ्रूण्** 10 Ā. (भ्रूणयते) 1 To hope. -2 To trust, confide. -3 To wish, desire. -4 To fear.

**भ्रूणः** [भ्रूण्-घञ्] 1 An embryo, fœtus; सर्वा भ्रूणान्यारुषी Ṛv. 10. 155. 2. -2 A child, boy; उद्यम्य शस्त्रमायातं भ्रूणमप्याततायिनम् Śukra. 4. 1149. -3 A very learned Brāhmaṇa; भ्रूणहाऽभ्रूणहा (भवति) Bṛi. Up. 4. 3. 22; तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः। कथं वधं यथा बभ्रोर्मन्यते सन्मतो भवान्॥ Bhāg. 9. 9. 32. -4 A pregnant woman (गर्भिणी). -**Comp.** -**घ्न, -हन्** *a.* one who procures or causes abortion. -2 one who kills a learned Brāhmaṇa; अपि भ्रूणहणं मासात् पुनन्त्यहरहः कृताः Ms. 11. 248. -**हतिः, -हत्या** killing an embryo, causing abortion; भ्रूणहत्यां वा एते घ्नन्ति; Trisuparṇa 2; Y. 1. 64. -2 the killing of a learned Brāhmaṇa; भ्रूणहत्यामसि प्राप्ता Rām. 2. 74. 4 (com. शाखाध्येतृब्रह्महत्यां प्राप्तासि); अल्पेन तृषितो दुह्यन् भ्रूणहत्यां न मुच्यते Mb. 12. 26. 21. -**हन्तृ** *m.* 1 the killer of an embryo. -2 any mean murderer.

**भ्रेज्** 1 Ā. (भ्रेजते) To shine.

**भ्रे (भ्ले) षृ** 1 U. (भ्रेषति-ते, भ्लेषति-ते) 1 To go, move. -2 To fall, totter, trip, slip. -3 To fear. -4 To be angry.

**भ्रेषः** Moving, motion. -2 Tottering, wavering, slipping. -3 Deviation, swerving, aberration. -4 Deviation from rectitude, trespass, sin. -5 Loss, deprivation; क्रतुभ्रेषस्त्वत्तः क्रतुफलविधानव्यसनिनः Śiva-mahimna 21.

**भ्रौणहत्यम्** The killing of an embryo; P. VI. 4. 174.

**भ्लक्ष्** See भक्ष्.

**भ्लाश्** See भाश्.

# म

**मः** 1 Time. -2 Poison. -3 A magical formula. -4 The moon. -5 N. of Brahman; मकारेणोच्यते ब्रह्मा. -6 Of Viṣṇu. -7 Of Śiva. -8 Of Yama. -9 (In prosody) A syllabic foot (गण) consisting of three long syllables; मो भूमिस्त्रिगुरु श्रियं दिशति यः V. Ratna. -10 N. of the fifth (मध्यम) note in music. -**मम्** 1 Water. -2 Happiness, welfare.

**मंह्** 1 Ā. (मंहते) 1 To grow, increase. -2 To give, grant. -3 To speak. -4 To shine.

**मंहनीय** *a.* Ved. 1 Praiseworthy. -2 Great, valuable.

**मंहिष्ठ** *a.* Ved. 1 Very liberal or praiseworthy. -2 Exceedingly abundant. -3 Quite ready for.

**मकमकाय** Den. Ā. (मकमकायते) To croak (as a frog); Kav.

**मकरः** [मं विषं किरति कॄ-अच् Tv.] 1 A kind of sea-animal, a crocodile, shark; झषाणां मकरश्चास्मि Bg. 10. 31; मकरवक्त्र Bh. 2. 4. (Makara is regarded as an emblem of Cupid; cf. comps. below). -2 The sign *Capricornus* of the zodiac. -3 An array of troops in the form of a Makara; दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा। वराहमकराभ्यां वा...Ms. 7. 187; Śukra. 4. 1100. -4 An ear-ring in the shape of a Makara. -5 The hands folded in the form of a Makara. -6 N. of one of the nine treasures of Kubera. -7 The tenth arc of thirty degrees in any circle. -**Comp.** -**अङ्कः** an epithet of 1 the god of love. -2 the ocean. -**अश्वः** an epithet of Varuṇa. -**आकरः, -आवासः** the ocean; प्रविश्य मकरावासं यादोगणनिषेवितम् Mb. 7. 11. 19. -**आलयः** 1 the ocean. -2 a symbolical expression for the number 'four'. -**आसनम्** a kind of Āsana in yoga; मकरासनमावक्ष्ये वायूनां स्तम्भकारणात्। पृष्ठे पादद्वयं बद्ध्वा हस्ताभ्यां पृष्ठबन्धनम्॥ Rudrayāmala. -**कुण्डलम्**



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



an ear-ring in the shape of a Makara; हेमाङ्गदलसद्बाहुः स्फुरन्मकरकुण्डलः ( रराज ) Bhāg. 8. 15. 9. **–केतनः, –केतुः, –केतुमत्** *m.* epithets of the god of love. **–ध्वजः** 1 an epithet of the god of love; संप्राप्तं मकरध्वजेन मथनं त्वत्तो मदर्थे पुरा Ratn. 1. 3; तत्प्रेमवारि मकरध्वजतापहारि Ch. P. 41. –2 a particular array of troops. –3 the sea. –4 a particular medical preparation. **–राशिः** *f.* the sign *Capricornus* of the zodiac. **–वाहनः** N. of Varuṇa. **–संक्रमणम्** the passage of the sun into the sign *Capricornus*. **–सप्तमी** the seventh day in the bright half of Māgha.

**मकरिन्** *m.* [ मकराः सन्त्यत्र इनि ] An epithet of the ocean.

**मकरिका** A particular head-dress; K.

**मकरी** The female of a crocodile. **–Comp. –पत्रम्, –लेखा** the mark of a Makarī on the face of Lakṣmī. **–प्रस्थः** N. of a town.

**मकरन्दः** [ मकरमपि द्यति कामजनकत्वात् दो-अवखण्डने क पृषो० मुम् Tv. ] 1 The honey of flowers, flower-juice; निपिद्धैरप्येभिर्लुलितमकरन्दो मधुकरैः Ve. 1. 1; मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः Bv. 1. 6, 8. –2 A kind of jasmine. –3 The cuckoo. –4 A bee. –5 A kind of fragrant mango tree. –6 (In music) A kind of measure. **–न्दम्** A filament.

**मकरन्दवत्** *a.* Filled with honey. **–ती** The *Patala* creeper or its flower.

**मकरन्दिका** A kind of metre.

**मकारः** 1 The syllable म. –2 Each of the following five मद्य, मत्स्य, मांस, मैथुन and मुद्रा; see पञ्चमकार.

**मकुटम्** A crown; cf. मुकुट; Mb. 3.

**मकुतिः** A government order addressed to the Śūdras ( शूद्रशासन ).

**मकुरः** [ मक-उरच् पृषो० ] 1 A mirror. –2 The *Bakula* tree. –3 A bud. –4 The Arabian jasmine. –5 The rod or handle of a potter's wheel.

**मकुलः** 1 The *Bakula* tree. –2 A bud.

**मकुष्टः, –मकुष्टकः** A kind of kidney-bean or rice.

**मकुष्ठ** *a.* Slow. **–ष्ठः** A kind of kidney-bean or rice.

**मकूलकः** 1 A bud. –2 The tree called दन्ती.

**मक्क** 1 Ā. ( मक्कते ) To go, move.

**मक्कलः** A dangerous kind of abscess in the abdomen ( of lying-in women ).

**मक्कुलः** Benzoin, red chalk.

**मक्कोलः** Chalk ( सुधा ).

**मक्ष्** 1 P. ( मक्षति ) 1 To accumulate, heap, collect. –2 To be angry.

**मक्षः** 1 Wrath. –2 Hypocrisy. –3 A multitude, collection. **–Comp. –वीर्यः** the tree पियाल.

**माक्षिकः, –मक्षि ( क्षी ) का** A fly, bee; भो उपस्थितं नयनमधु संनिहिता मक्षिका च M. 2. **–Comp. –मलम्** wax.

**मक्षुणम्** A particular measure ( = 7 māṣas. ).

**मख्** or **मङ्ख्** 1 P. ( मखति, मङ्खति ) To go, move, creep.

**मख** *a.* [ मख् संज्ञायां घ ] Ved. 1 Adorable, fit to be worshipped with oblations. –2 Lively, active, cheerful. **–खः** 1 A sacrificial rite; अकिंचनत्वं मखजं व्यनक्ति R. 5. 16; Ms. 4. 24; R. 3. 39. –2 A festival. –3 Worship; वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः Bhāg. 11. 27. 7. **–Comp. –अंशभाज्** *m.* a god. **–अग्निः, –अनलः** sacrificial fire. **–अन्नम्** the seed of Euryale Ferox ( कमलबीज ). **–असुहृद्** *m.* an epithet of Śiva. **–क्रिया** a sacrificial rite. **–त्रातृ** *m.* an epithet of Rāma; घ्राणं पातु मखत्राता Rām. stotra 5. **–द्विष्** *m.* a demon, a Rakṣasa; तत्र यावधिपती मखद्विषां तौ शरव्यमकरोत् स नेतरान् R. 11. 27; 3. 45; U. 5. 4. **–द्वेषिन्** *m.* an epithet of Śiva. **–प्रभुः** *m.* the Soma plant. **–मृगव्याधः** an epithet of Śiva; मखमृगव्याधोत्तमाङ्गस्थलस्यास्तु ...... N. 22. 140. **–हन्** *n.* an epithet 1 of Indra. –2 of Śiva.

**मखस्यु** *a.* Ved. 1 Wishing for wealth or sacrifice; त्वं जघन्थ नमुचिं मखस्युम् Ṛv. 10. 73. 7. –2 Lively, sprightly, cheerful.

**मगः, मगुः** 1 A magian. –2 A priest of the sun; B. P.

**मगन्दः** A usurer.

**मगधः** 1 N. of a country, the southern part of Bihar; अस्ति मगधेषु पुष्पपुरी नाम नगरी Dk. 1; अगाधसत्त्वो मगधप्रतिष्ठः R. 6. 21. –2 A bard, minstrel. **–धाः** ( pl. ) The people of Magadha, the Magadhas. **–धा** 1 The town of the Magadhas. –2 Long pepper. **–Comp. –ईश्वरः** 1 a king of the Magadhas. –2 N. of Parantapa; प्राक् संनिकर्षं मगधेश्वरस्य R. 6. 20. –3 N. of Jarāsandha. **–उद्भवा** long pepper; फलं बृहत्या मगधोद्भवानाम् Suśruta. **–देशः** the country of Magadha. **–पुरी** the city of Magadha. **–लिपिः** *f.* writing or character of the Magadhas.

**मगधीय** *a.* Belonging to or coming from Magadha.

**मगध्यति** Den. P. 1 To surround. –2 To serve, be a slave, attend upon, ( as a bard, waiter &c. ).

**मग्न** See मस्ज्.

**मघः** 1 N. of one of the Dvīpas or divisions of the universe. –2 N. of a country. –3 A kind of drug or medicine. –4 Pleasure. –5 N. of the tenth lunar mansion; see मघा. –6 See मघम्. **–घम्** 1 A kind of flower. –2 A gift, present. –3 Wealth, riches ( Ved. ). **–Comp. –गन्धः** Mimusops Elengi ( बकुल ).

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मघवः, मघवत्** *m.* N. of Indra.

**मघवन्** *a.* [ मह्-पूजायां कनिन् नि० हस्य घः वुगागमश्च Un. 1. 156 ] Liberal, munificent. -*m.* ( Nom. sing. मघवा; acc. pl. मघोनः ) 1 N. of Indra; दुदोह गां स यज्ञाय सस्याय मघवा दिवम् R. 1. 26; 3. 46; Ki. 3. 52; Ku. 3. 1. -2 An owl ( पेचक ). -3 N. of Vyāsa.

**मघा** N. of the tenth lunar mansion containing five stars. -**Comp.** -**त्रयोदशी** the thirteenth day of the dark half of Bhādrapada. -**भवः, -भूः** the planet Venus.

**मघा, ( -घी )** A kind of corn.

**मङ्क्** 1 Ā. ( मङ्कते ) 1 To go, move. -2 To decorate, adorn.

**मङ्किलः** A forest-conflagration.

**मङ्कुः** A blotch.

**मङ्कुकः** A kind of musical instrument ( v.l. मड्डुक? ); अन्या कक्षगतेनैव मङ्कुकेनासितेक्षणा Rām. 5. 10. 38.

**मङ्कुरः** A mirror.

**मङ्कुशः** One knowing dancing and singing (माहिष्य).

**मङ्क्षणम्** An armour for the legs, greaves.

**मङ्क्षु** *ind.* 1 Immediately, quickly, soon; मङ्क्षूदपाति परितः पटलैरलीनाम् Śi. 5. 37. -2 Exceedingly, very much. -3 Truly, really.

**मङ्खः** 1 A royal bard. -2 A medicament of a particular class. -3 N. of a lexicographer.

**मङ्ग्** 1 U. ( मङ्गति-ते ) 1 To go, move. -2 To appear beautiful ( मगि मण्डने ); रम्याकर्षैर्ममङ्गिरे ( अश्वाः ) Bk. 14. 10.

**मङ्गः** 1 The head of a boat. -2 The side of a ship.

**मङ्गल** *a.* [ मङ्ग्-अलच्; Un. 5. 70 ] 1 Auspicious, lucky, propitious, fortunate; मङ्गलदिवसः, मङ्गलवृषभः &c. -2 Prosperous, doing or faring well. -3 Brave. -**लम्** 1 ( *a* ) Auspiciousness, propitiousness; जनकानां रघूणां च यत् कृत्स्नं गोत्रमङ्गलम् U. 6. 42; R. 6. 9; 10. 67. ( *b* ) Happiness, good luck or fortune, bliss, felicity; भद्रं भद्रं वितर भगवन् भूयसे मङ्गलाय Māl. 1. 3; U. 3. 48. ( *c* ) Well-being, welfare, good; सङ्गः सतां किमु न मङ्गलमातनोति Bv. 1. 122; ( also *m.* in these senses ). -2 A good omen, anything tending to an auspicious issue. -3 A blessing, benediction. -4 An auspicious or lucky object. -5 An auspicious occasion or event, a festivity. -6 Any solemn or auspicious ceremony or rite ( such as marriage ). -7 Any ancient custom. -8 Turmeric. -9 ( In music ) A particular composition. -**लः** 1 The planet Mars. -2 N. of Agni. -**ला, -ली** 1 A faithful wife -2 Dūrvā grass. -3 N. of Durgā. -**Comp.** -**अक्षताः** ( *m.* pl. ) rice thrown over persons by Brāhmaṇas when pronouncing blessings. -**अगरु** *n.* a variety of sandal. -**अयनम्** the way to happiness or prosperity; परममङ्गलायनगुणकथनोऽसि Bhāg. 5. 3. 11. -**अलंकृत** *a.* decorated with auspicious ornaments; आददे वचसामन्ते मङ्गलालंकृतां सुताम् Ku. 6. 87; M. 1. 14. -**अष्टकम्** a benedictory verse or verses repeated by priests over a youth and maiden, when being married, to promote their good luck. -**आह्निकम्** 1 any daily religious rite performed for good luck. -2 a vase full of water carried in front of a procession. -**आचरणम्** 1 an auspicious introduction in the form of a prayer (for the attainment of success) at the beginning of any undertaking or of any work of composition. -2 pronouncing a blessing. -**आचारः** 1 an auspicious or pious ceremony or usage. -2 a benediction, pronouncing a blessing. -3 (in music) a particular composition. -**आतोद्यम्** a drum beaten on festive occasions. -**आदेशवृत्तिः** a fortune-teller; Ms. 9. 258. -**आरम्भः** an epithet of Gaṇeśa. -**आलम्भनम्** touching anything auspicious. -**आलयः, -आवासः** a temple. -**आवह** *a.* auspicions. -**इच्छा** benediction, felicitation. -**इच्छु** *a.* desirous of happiness or prosperity. -**करणम्** repeating a prayer for the success of any undertaking. -**कलशः** a vessel used at festivals. -**कारक, -कारिन्** *a.* auspicious. -**कार्यम्** any festive occasion, a religious or auspicious ceremony. -**कालः** an auspicious occasion; Ś. 4. -**क्षौमम्** a silken cloth worn on occasions of festivity; दधतो मङ्गलक्षौमे वसानस्य च वल्कले R. 12. 8. -**गृहम्** an auspicious house or temple. -**ग्रहः** an auspicious planet. -**घटः, -पात्रम्** a pot filled with water offered to the gods on festive occasions. -**चण्डिका, -चण्डी** N. of Durgā; मङ्गलेषु च या दक्षा सा च मङ्गलचण्डिका Brav. P. -**छायः** the *plakṣa* tree. -**तूर्यम्** a musical instrument, such as a trumpet, drum &c., played on festive or auspicious occasions; सुखश्रवा मङ्गलतूर्यनिस्वनाः R. 3. 19. -**देवता** an auspicious or tutelary deity. -**ध्वनिः** an auspicious music (at the time of some festival). -**पत्रम्** a leaf serving as an amulet. -**पाठकः** a bard, minstrel, professional panegyrist; आः दुरात्मन् वृथामङ्गलपाठक शैलूषापसद Ve. 1. -**पुष्पम्** an auspicious flower. -**पूजित** *a.* honoured with a sacrificial offering. -**प्रतिसरः** 1 an auspicious cord or string, the auspicious thread worn by a married woman round her neck as long as her husband lives; अन्त्रैः कल्पितमङ्गलप्रतिसराः ( अङ्गनाः ) Māl. 5. 18. -2 the cord of an amulet. -**प्रद** *a.* auspicious. (-**दा** ) turmeric. -**प्रस्थः** N. of a mountain. -**भेरी** a drum beaten on festive occasions. -**मात्रभूषण** *a.* decked in auspicious ornaments only, such as the auspicious thread, saffron-mark &c.; सितांशुका मङ्गलमात्रभूषणा V. 3. 12. -**मालिका** marriage-music. -**वचस्** *n.*, -**वादः** a benedictory or congratulatory expression, benediction, blessing. -**वादिन्** *a.* expressing blessings or congratulations, wishing joy. -**वाद्यम्** see मङ्गलतूर्य. -**वारः, -वासरः** Tuesday. -**विधिः** 1 a festive or auspicious rite. -2 preparations for a festival. -**वृषभः** an ox with auspicious signs. -**शब्दः**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



greeting, a benedictory expression. **-समालम्भनम्** an auspicious unguent. **-सूत्रम्** see मङ्गलप्रतिसर. **-स्नानम्** a solemn or auspicious ablution. **-स्वरः** a sea-shell.

**मङ्गलाव्रतः** An epithet of Śiva (devoted to Umā).

**मङ्गलीय** *a.* Auspicious; fortunate.

**मङ्गल्य** *a.* [मङ्गलाय हितं यत्] 1 Auspicious, fortunate, happy, lucky, prosperous; मङ्गल्यं मङ्गलं विष्णुम् Mb. 1.1.24; मङ्गल्यं ब्राह्मणस्य स्यात् Ms. 2. 31. -2 Pleasing, agreeable, beautiful. -3 Holy, pure, pious; त्रिलोकीमङ्गल्याम् U. 4. 10. **-ल्यः** 1 The sacred fig-tree. -2 The cocoa-nut tree. -3 A sort of pulse. -4 The Bilva tree. **-ल्या** 1 A species of fragrant sandal; मङ्गल्यागुरुशिशिरा गन्धाढ्या दोषवाहिका Rājanighaṇṭu. -2 N. of Durgā. -3 A kind of aloe-wood. -4 A particular perfume. -5 A particular yellow pigment. **-ल्यम्** 1 Auspicious water for the coronation of a king (brought from various holy places). -2 Gold. -3 Sandal-wood. -4 Red lead. -5 Sour curds.

**मङ्गल्यकः** A kind of pulse (मसूर).

**मङ्गिनी** A boat, ship. **-Comp. -शिरस्** the prow of a vessel.

**मङ्गुरः** A kind of fish.

**मङ्गुलम्** An evil, a sin.

**मङ्घ्** I. 1 P. (मङ्घति) To adorn, decorate. -II. 1 Ā. (मङ्घते) 1 To cheat, deceive. -2 To begin. -3 To blame, censure. -4 To go, move, move quickly. -5 To start, set out.

**मच्** 1 Ā. (मचते) 1 To be wicked. -2 To cheat, deceive. -3 To be vain or proud. -4 To pound, ground.

**मचर्चिका** A word used at the end of a noun to denote 'excellence' or 'the best of its kind'; as गोमचर्चिका 'an excellent cow or bull'; मतल्लिकादयो नियतलिङ्गा न तु विशिष्यनिघ्नाः Sk.; cf. उद्घः.

**मच्छः** A fish (corrupted from मत्स्य).

**मज्जन्** *m.* [मस्ज्-कनिन् Uṇ. 1. 156] 1 The marrow of the bones and flesh; अस्थि यत् स्वाग्निना पक्वं तस्य सारं द्रवो घनः। यः स्वेदवत् पृथग्भूतः स मज्जेत्यभिधीयते Bhāva. P. -2 The pith of plants. **-Comp. -कृत्** *n.* a bone. **-समुद्भवः** semen virile.

**मज्जनम्** [मस्ज्-भावे ल्युट्] 1 Sinking, plunging, sinking under water, immersion. -2 Inundating, deluging. -3 Bathing, ablution; प्रत्यग्रमज्जनविशेषविविक्तकान्तिः Ratn. 1. 21; R. 16. 57. -4 Drowning. -5 The marrow of the bones and flesh (= मज्जन्).

**मज्जनः** An elephant in the eighth year; Mātaṅga L. 5. 9.

**मज्जा** [मस्ज्-अच् टाप्] 1 The marrow of the bones and flesh. -2 The pith of plants. **-Comp. -जम्** 1 semen virile. -2 a kind of bdellium (भूमिजगुग्गुल). **-मेहः** a disease of urinary organs. **-रजस्** *n.* 1 a particular hell. -2 bdellium. **-रसः** semen virile. **-सारः** a nutmeg.

**मज्जिका** The female of the Indian crane.

**मज्जूषा** See मञ्जूषा.

**मञ्च्** 1 Ā. (मञ्चते) 1 To hold. -2 To grow high or tall. -3 To go, move. -4 To shine. -5 To adore. -6 =मच् q. v.

**मञ्चः** [मञ्च्-घञ्] 1 A couch, bedstead, sofa, bed. -2 A raised seat, *dais*, a platform resting on columns, a seat of honour or state, throne; मञ्चाः क्रियन्तां विविधा मकरध्वजपरिश्रिताः Bhāg. 10. 36. 25; स तत्र मञ्चेषु मनोज्ञवेषान् R. 6. 1; 3. 10. -3 An elevated shed in a field (for a watchman). -4 A pulpit. -5 A stage, platform. **-Comp. -नृत्यम्** a kind of dance. **-पीठम्** a seat on a platform. **-मण्डपः** 1 a temporary shed resting upon bamboo posts. -2 a platform erected on festive occasions (as marriages &c.).

**मञ्चकम्** [मञ्च स्वार्थे क] 1 A couch, bed, sofa. -2 A raised seat or platform. -3 A stand for holding fire; वारिधानी तु कुम्भश्च मार्जनी मञ्चकस्तथा Ks. **-Comp. -आश्रयः** 'a bed-bug', a bug in general.

**मञ्चिका** 1 A chair. -2 A trough, tray. -3 (In music) A kind of measure.

**मञ्ज्** 10 U. (मञ्जयति-ते) 1 To clean, purify, wipe off. -2 To sound.

**मञ्जरम्** 1 A cluster of blossoms. -2 A pearl. -3 The plant *Tilaka*.

**मञ्जरिः, -री** *f.* 1 A shoot, sprout, spring; निवपेः सहकारमञ्जरीः Ku. 4. 38; सदृशकान्तिरलक्ष्यत मञ्जरी R. 9. 44; 16. 51; so स्फुरतु कुचकुम्भयोरुपरि मणिमञ्जरी Gīt. 10; मुखं मुक्तारुचो धत्ते घर्माम्भःकणमञ्जरीः Kāv. 2. 71. -2 A cluster of blossoms. -3 A flower-stalk. -4 A (parallel) line or row. -5 A pearl; cf. मञ्जरीपिञ्जरित 'bedecked with pearls'. -6 A creeper. -7 The holy basil. -8 The plant *Tilaka*. **-Comp. -चामरम्** a *chowrie* in the form of a sprout, fan-like sprout; व्याधूयन्ते निचुलतरुभिर्मञ्जरीचामराणि V. 4. 13. **-जालम्** a dense mass of buds or flowers. **-नम्रः** the plant called वेतस.

**मञ्जरित** *a.* [मञ्जर्यः संजाता अस्य इतच्] 1 Furnished with or possessing clusters of blossoms. -2 Mounted on a stalk (as a bud).

**मञ्जरीकः** A species of fragrant Tulasī.

**मञ्जरीकृ** P. To turn into flower or bud.

**मञ्जा** 1 A she-goat. -2 A cluster of blossoms. -3 A creeper.

**मञ्जिः, -ञ्जी** *f.* 1 A cluster of blossoms. -2 A creeper. **-Comp. -फला** the plantain tree.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मञ्जिका** A harlot, prostitute, courtezan.

**मञ्जिमन्** *m*. Beauty, loveliness.

**मञ्जिष्ठ** *a*. Bright red; नीललोहितमाञ्जिष्ठा विसृजन्तर्चिषः पृथक् Mb. 16. 2. 12; also मञ्जिष्ठक; पाण्डुरारुणवर्णानि नीलमाञ्जिष्ठकानि च Rām. 5. 1. 79.

**मञ्जिष्ठा** [ अतिशयेन मञ्जिमती इष्ठन् मतुपो लोपः Tv. ] Bengal or Indian madder; मञ्जिष्ठां नागसंभवम् Śiva B. 30. 19. **–Comp. –मेहः** a kind of urinary disease. **–रागः 1** the colour of the Indian madder. **–2** ( fig. ) attachment as charming and durable as the colour of the madder, *i. e*. durable or permanent attachment.

**मञ्जीरः, –रम्** [ मञ्ज्-ध्वनौ ईरन् ] An anklet or ornament for the foot ( नूपुर ); सिञ्जानमञ्जुमञ्जीरं प्रविवेश निकेतनम् Gīt 11; or मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिषु लोलम् 5; Māl. 1. **–रम्** A post round which the string of the churning stick passes.

**मञ्जीलः** A village mostly inhabited by washermen.

**मञ्जु** *a*. [ मञ्ज्-उन् ] **1** Lovely, beautiful, charming, sweet, pleasing, agreeable, attractive; स्खलदसमञ्जसमञ्जुजल्पितं ते ( स्मरामि ) U. 4. 4; अयि दलदरविन्द स्यन्दमानं मरन्दं तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः Bv. 1. 5; तन्मञ्जु मन्दहसितं श्वसितानि तानि 2. 5. **–Comp. –केशिन्** *m*. an epithet of Kṛṣṇa. **–गति, –गमन** *a*. having a lovely gait. ( **–ता** ) **1** a goose. **–2** a flamingo. **–गर्तः** N. of the country called Nepāl. **–गिर्** *a*. sweet-voiced; एते मञ्जुगिरः शुकाः Kāv. 2. 9. **–गुञ्जः** a charming hum. **–घोष** *a*. uttering a sweet sound. ( **–षः** ) a dove. **–नाशी 1** a handsome woman (?). **–2** an epithet of Durgā. **–3** of Śachī, wife of Indra. **–पाठकः** a parrot. **–प्राणः** an epithet of Brahmā. **–भद्रः** N. of one of the Jinas. **–भाषिन्, –वाच्, –वादिन्** *a*. sweet-speaking; ( गिरम् ) अनुवदति शुकस्ते मञ्जुवाक् पञ्जरस्थः R. 5. 74; 12. 39. **–भाषिणी** *f*. N. of a metre; सजसाजगौ भवति मञ्जुभाषिणी V. Ratna. **–मणिः** *m*. a topaz ( पुष्कराज ). **–वक्त्र** *a*. having a beautiful face, handsome. **–श्रीः** N. of a बोधिसत्व. **–सौरभम्** a kind of metre. **–स्वन, –स्वर** *a*. sweet-sounding.

**मञ्जुल** *a*. [ मञ्जु-सिध्मा° लच्, मञ्ज्-उ लच् वा ] Lovely, beautiful, agreeable, charming, sweet, melodious ( voice &c. ); संप्रति मञ्जुलवञ्जुलसीमनि केलिशयनमनुयातम् Gīt. 11; कूजितं राजहंसानां वर्धते मदमञ्जुलम् Kāv. 2. 334. **–लः 1** A kind of gallinule. **–लम् 1** An arbour, a bower. **–2** A spring, well. **–3** The state of being variegated.

**मञ्जु ( ञ्जू ) षा, मञ्जु ( ञ्जू ) षिका** [ मञ्ज्-ऊषन् ] **1** A box, casket, chest, receptacle; मदीयपद्यरत्नानां मञ्जूषैषा मया कृता Bv. 4. 45; अपारकोषगर्भासु मञ्जूषासु निजैर्नरैः Śiva B. 29. 56. **–2** A large basket, hamper; मञ्जुषाऽपि च मञ्जूषा पेटा च पेटिकेत्यपि Śabdaratnāvalī. **–3** Madder ( = मञ्जिष्ठा ). **–4** A stone.

**मटकः, –कम्** A dead body.

**मटची, मटती** Hail; मटचीहतेषु कुरुष्वाटिकया सह Ch. Up. 1. 10. 1.

**मट ( ठ ) ची** A locust.

**मटुस्फटिः** ' Beginning of pride ', incipient pride.

**मट्टकम् 1** The ridge of a roof. **–2** Eleusine Coracana ( Mar. मटकी, नाचणी ).

**मठ्** 1 P. ( मठति ) **1** To dwell, inhabit. **–2** To go. **–3** To grind.

**मठः, –ठम्** [ मठत्यत्र मठ् घञर्थे क ] **1** The hut of an ascetic, a small cell or room. **–2** A monastery, convent. **–3** A seminary, college, place of learning. **–4** A temple. **–5** A cart drawn by oxen. **–ठी 1** A cell. **–2** A cloister, convent. **–Comp. –अधिपतिः, –अध्यक्षः** the superintendent of a monastery; principal of a college. **–आयतनम्** a monastery, college. **–चिन्ता** charge of a convent; वर्षं यावत् किमन्येन मठचिन्तां दिनत्रयम् Pt. 2. 63.

**मठर** *a*. **1** Intoxicated, drunk. **–2** Hard, harsh ( sound ).

**मठिका 1** A small cell. **–2** A hut or college.

**मडकः** A kind of corn; L. D. B.

**मड्डुः, मड्डुकः** A kind of drum; see मड्डुक.

**मड्मडायित** *a*. Gulped down the throat, swallowed up; वत्सतरी मड्मडायिता U. 4.

**मण्** 1 P. ( मणति ) To sound, murmur.

**मणिः** [ मण्-इन् स्त्रीत्वपक्षे वा ङीप् ] ( Said to be *f*. also, but rarely used ) **1** A jewel, gem, precious stone; मणिर्लुठति पादेषु काचः शिरसि धार्यते । यथैवास्ते तथैवास्तां काचः काचो मणिर्मणिः H. 2. 68; अलब्धशाणोत्कषणा नृपाणां न जातु मौलौ मणयो वसन्ति Bv. 1. 73; मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः R. 1. 4; 3. 18. **–2** An ornament in general. **–3** Anything best of its kind; cf. रत्न. **–4** A magnet, loadstone. **–5** The wrist. **–6** A water-pot. **–7** Clitoris. **–8** Glans penis. **–9** A crystal; क्वचिन्मणिनिकाशोदाम् ( नदीम् ) Rām. 2. 95. 9. **–10** The fleshy excrescence on the neck of a goat ( also written मणी in these senses ). **–11** An ingot, a lump ( of gold ); यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात् Ch. Up. 6. 1. 5. **–Comp. –इन्द्रः, –राजः** a diamond. **–कण्ठः** the blue jay. **–कण्ठकः** a cock. **–कर्णिका, –कर्णी** N. of a sacred pool in Benares. **–काचः** the feathered part of an arrow. **–काञ्चनयोगः** a rare combination of mutually worthy things. **–काननम्** the neck. **–कारः** a lapidary, jeweller; मणिकाराश्च ये केचित् Rām. 2. 83. 12. **–गुणः** a quality of gems; षडश्रश्चतुरश्रो वृत्तो वा, तीव्ररागसंस्थानवानच्छः स्निग्धो गुरुरर्चिष्मानन्तर्गतप्रभः प्रभानुलेपी चेति मणिगुणाः Kau. A. 2. 11. 29. **–ग्रीवः** a son of Kubera. **–तारकः** the crane or Sārasa bird. **–तुण्डः** a striped hyena; Nighaṇṭaratnākara. **–तुलाकोटिः** a foot ornament consisting of jewels. **–दण्ड** *a*. having a

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



handle adorned with jewels. **–दर्पणः** a jewelled mirror. **–दीपः** 1 a lamp having jewels; मणिदीपप्रकाशितं...... पश्येदं रत्नमन्दिरम् –2 a jewel serving as a lamp. **–दोषः** a flaw or defect in a jewel. **–द्वीपः** 1 the hood of the serpent Ananta. –2 N. of a fabulous island in the ocean of nectar; सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिवृते । मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे Saundaryalaharī. **–धनुः** *m.*, **–धनुस्** *n.* a rainbow. **–पाली** a female keeper of jewels. **–पुष्पकः** N. of the conchshell of Sahadeva; नकुलः सहदेवश्च सुघोषमणिपुष्पकौ Bg. 1. 16. **–पूरः** 1 the navel. –2 a kind of bodice richly adorned with jewels. (**–रम्**) 1 N. of a town in Kaliṅga. –2 the pit of the stomach, or a mystical circle on the navel (also मणिपूरक); तदूर्ध्वे नाभिदेशे तु मणिपूरं महाप्रभम् । ...... मणिवद् भिन्नं तत्पद्मं मणिपूरं तथोच्यते Yogagrantha. °पतिः an epithet of Babbruvāhana. **–प्रवेकः** a most excellent jewel. **–प्रभा** N. of a metre. **–बन्धः** 1 the wrist; रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते Ś. 7. –2 the fastening of jewels; R. 12. 102; मणिबन्धैर्निगूढैश्च सुश्लिष्टशुभसन्धिभिः Garuḍa P. –3 a kind of metre. **–बन्धनम्** 1 fastening on of jewels, a string or ornament of pearls. –2 that part of a ring or bracelet where the jewels are set; collet; Ś. 6. –3 the wrist; ......मणिबन्धनात् कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते Ś. 3. 13. **–बीजः, –वीजः** the pomegranate tree. **–भाधरः** an Indian crane; Nighaṇṭaratnākara. **–भित्तिः** *f.* N. of the palace of Śeṣa. **–भूः** *f.* a floor set with jewels. **–भूमिः** *f.* 1 a mine of jewels. –2 a jewelled floor, floor inlaid with jewels. **–मण्डपः** 1 N. of the residence of Śeṣa. –2 a crystal hall. **–मन्तकम्** a variety of diamonds; Kau. A. 2. 11. 29. **–मन्थम्** rock-salt; कणान्मणिमन्थभूधर भवशिलालेहायेह्राचणो लवणस्यति N. 19. 18. **–माला** 1 a string or necklace of jewels. –2 lustre, splendour, beauty. –3 a circular impression left by a bite (in amorous sports). –4 N. of Lakṣmī. –5 N. of a metre. **–मेखल** *a.* girdled with gems. **–यष्टिः** *m.*, *f.* a jewelled stick, a string of jewels. **–रत्नम्** a jewel, gem. **–रागः** the colour of jewels. (**–गम्**) vermilion. **–विग्रह** *a.* jewelled; काञ्चनीं मणिविग्रहाम् Rām. 6. 128. 75. **–विशेषः** an excellent jewel. **–शिला** a jewelled slab. **–सरः** a necklace; मणिसरममलं तारकपटलं नखदशशशिभूषितं Gīt. **–शृङ्गः** the god of the sun. **–सूत्रम्** a string of pearls. **–सोपानम्** a jewelled staircase. **–स्तम्भः** a pillar inlaid with jewels. **–हर्म्यम्** a jewelled or crystal palace.

**मणिकः, –कम्** 1 A water-jar; विरूढमूषिका रथ्या विभिन्नमणिकास्तथा Mb. 16. 2. 5; तस्माच्च शिल्पान्मणिकादिकारी प्रसिद्धनामाजनि कुम्भकारः N. 7. 75. –2 =अजागलस्तन q. v. –3 The front part of the male organ of generation. **–कः** 1 A crystal palace. –2 A jewel, gem.

**मणितम्** An inarticulate murmuring sound uttered at cohabitation; मणितं रतिकूजितम् Abh. Chin. 1408; सीत्कृतानि मणितं करुणोक्तिः Śi. 10. 75; संभ्रान्ता मणितवतीव पद्मवाटी Rām. Ch. 7. 67.

**मणिमत्** *a.* Jewelled; गण्डस्थलोन्नतमुखं मणिमत्किरीटम् Bhāg. **–m.** 1 The sun. –2 N. of a mountain. –3 N. of a place of pilgrimage.

**मणीचम्** 1 A land. –2 A flower. –3 A pearl.

**मणीचकः** A king-fisher. **–कम्** 1 The moon-stone. –2 A flower.

**मणीवकम्** A flower.

**मण्ठ्** 1 Ā. (मण्ठते) 1 To long for. –2 To remember with regret, think of sorrowfully.

**मण्ठः** A kind of baked sweetmeat.

**मण्ड्** I. 1 P., 10 U. (मण्डति, मण्डयति-ते, मण्डित) 1 To adorn, decorate; प्रभवति मण्डयितुं वधूरनङ्गः Ki. 10. 59; Bk. 10. 23. –2 To rejoice. -II. 1 Ā. (मण्डते) 1 To clothe, dress. –2 To surround, encompass. –3 To distribute, divide.

**मण्डः, –ण्डम्** [ मन्-ड तस्य नेत्वं, मण्ड्-अच् वा ] 1 The thick oily matter or scum forming on the surface of any liquid. –2 The scum of boiled rice; नीवारौदनमण्डमुष्णमधुरम् U. 4. 1; तण्डुलानां सुसिद्धानां चतुर्दशगुणे जले । रसः सिक्थैर्विरहितो मण्ड इत्यभिधीयते Bhāva. P. –3 Cream (of milk). –4 Foam, froth or scum in general; घृतात्परं मण्डमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढम् Śvet. Up. 4. 16; श्रोतुमिच्छामि तज्ज्ञानं घृतं मण्डमयं यथा Mb. 12. 318. 68. –5 Ferment. –6 Gruel. –7 Pith, essence. –8 The head. –9 The spirituous part of wine; राज्यं गतधनं साधो पीतमण्डां सुरामिव Rām. 2. 36. 12. **–ण्डः** 1 An ornament, decoration. –2 A frog. –3 The castor-oil tree. **–ण्डा** 1 Spirituous liquor. –2 The emblic myrobalan tree. **–Comp. –उदकम्** 1 barm, yeast. –2 decorating walls, floors &c. on festive occasions. –3 mental agitation or excitement. –4 variegated colour. **–जातम्** the second change which takes place in sour milk. **–प** *a.* drinking scum or cream. **–पीठिका** two quarters of the compass. **–हारकः** a distiller of spirits &c.

**मण्डकः** 1 A kind of baked flour. –2 A very thin kind of cake (Mar. मांडे); पयःस्मिता मण्डकमण्डनाम्बरा N. 16. 107. –3 A particular musical air.

**मण्डन** *a.* [ मण्डयति मण्ड्-ल्यु ल्युट् वा ] 1 Adorning, decorating. –2 Fond of ornaments. **–नम्** The act of decorating or ornamenting, adorning; मामक्षमं मण्डनकालहानेः R. 13. 16; मण्डनविधिः Ś. 6. 5. –2 An ornament, decoration, embellishment; सा मण्डनान्मण्डनमन्वभुङ्क्त Ku. 7. 5; Ki. 8. 40; R. 8. 71; स्वाङ्गैरेव विभूषितासि वहसि क्लेशाय किं मण्डनम् Nāg. 3. 6. Also मण्डना. **–नः** (or **मण्डनमिश्रः**) N. of a philosopher who is said to have been defeated in controversy by Śaṅkarāchārya; शिष्यप्रशिष्यैरुपगीयमानमवेहि तन्मण्डनमिश्रधाम Śaṅkaradigvijayam. **–Comp. –कालः** time for adorning. **–प्रिय** *a.* fond of ornaments.

**मण्डपः** [ मण्डं भूषां पाति पा-क, मण्ड्-कपन् वा ] 1 A temporary hall erected on ceremonial occasions, an open

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



hall; विवाहमण्डप. -2 A tent, pavilion; दीर्घेष्वमी नियमिताः पटमण्डपेषु निद्रां विहाय वनजाक्ष वनायुदेश्याः R. 5. 73. -3 An arbour, a bower, as in लतामण्डप; प्रत्यासन्नौ कुरबकवृतेर्माधवीमण्डपस्य Me. 80. -4 A building consecrated to a deity. -**Comp.** -**प्रतिष्ठा** the consecration of a temple.

**मण्डपकः, -पिका** 1 A small shed, shop. -2 A small pavilion or tent.

**मण्डयन्तः** 1 An ornament, a decoration. -2 An actor. -3 Food. -4 An assemly of women. -**न्ती** A woman.

**मण्डित** *p. p.* Adorned, decorated; माणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम् Gīt.; स्वयं च माण्डिता नित्यं परिमृष्टपरिच्छदा Bhāg. 7. 11. 26.

**मण्डित** N. of one of the Gaṇādhipas of the Jains.

**मण्डरी** A kind of cricket.

**मण्डल** *a.* [मण्ड्-कलच्] Round, circular; मण्डलाग्रा बृसीश्चैव गृहान्याः पृष्ठतो ययुः Rām. 5. 18. 12. -**लः** 1 circular array of troops. -2 A dog. -3 A kind of snake. -**लम्** 1 A circular orb, globe, wheel, ring, circumference, anything round or circular; न्यग्रोधं च सुमण्डलम् Mb. 12. 169. 12; करालफणमण्डलम् R. 12. 98; आदर्शमण्डलनिभानि समुल्लसन्ति Ki. 5. 41; स्फुरत्प्रभामण्डलया चकाशे Ku. 1. 24; so रेणुमण्डल, छायामण्डल, चापमण्डल, मुखमण्डल, स्तनमण्डल &c. -2 The charmed circle (drawn by a conjurer); मण्डले पन्नगो रुद्धो मन्त्रैरिव महाविषः Rām. 2. 12. 5; जानन्ति तन्त्रयुक्तिं यथास्थितं मण्डलमभिलिखन्ति Mu. 2. 1. -3 A disc, especially of the sun or moon; तेनातपत्रामलमण्डलेन R. 16. 27; अपर्वणि ग्रहकलुषेन्दुमण्डला (विभावरी) M. 4. 15; दिनमणिमण्डलमण्डन भवखण्डन ए Gīt. 1. -4 The halo round the sun or moon. -5 The path or orbit of a heavenly body. -6 A multitude, group, collection, assemblage, troop, company; एवं मिलितेन कुमारमण्डलेन Dk.; अखिलं चारिमण्डलम् R. 4. 4. -7 Society, association. -8 A great circle. -9 The visible horizon. -10 A district or province. -11 A surrounding district or territory. -12 (In politics) The circle of a king's near and distant neighbours; मण्डलचरितम् Kau. A. 1. 1. 1; सततमुकृती भूयाद् भूपः प्रसादितमण्डलः Ve. 6. 44; उपगतोऽपि च मण्डलनाभिताम् &c. R. 9. 15. (According to Kāmandaka quoted by Malli. the circle of a king's near and distant neighbours consists of twelve kings:— विजिगीषु or the central monarch, the five kings whose dominions are in the front, and the four kings whose dominions are in the rear of his kingdom, the मध्यम or intermediate, and उदासीन or indifferent king. The kings in the front as well as in the rear are designated by particular names; see Malli. *ad loc;* cf. also Śi. 2. 81. and Malli. thereon. According to some the number of such kings is four, six, eight, twelve or even more; see Mit. on Y. 1. 345. According to others, the circle consists of three kings only:—the प्राकृतारि or natural enemy, (the sovereign of an adjacent country), the प्राकृतमित्र natural ally, (the sovereign whose dominions are separated by those of another from the country of the central monarch with whom he is allied), and प्राकृतोदासीन or the natural neutral, (the sovereign whose dominions lie beyond those of the natural ally). -13 A particular position of the feet in shooting. -14 A kind of mystical diagram used in invoking a divinity. -15 A division of the Ṛigveda (the whole collection being divided into 10 Maṇḍalas or eight Aṣṭakas). -16 A kind of leprosy with round spots. -17 A kind of perfume. -18 A circular bandage (in surgery). -19 A sugar-ball, sweetmeat. -20 Sexual dalliance; नानाविचित्रकृतमण्डलमावहन्तीम् Bil. Ch. (उत्तरपीठिका) 38. -21 A circular gait; हय इव मण्डलमाशु यः करोति Rām. 6. 33. 35; Mb. 3. 19. 8. -22 A play-board (द्यूते शारीस्थापनपट्टम्); Mb. 8. 74. 15. -**ली** 1 A circle, orb &c. -2 A group, assemblage; तन्मोचनाय तेनाशु प्रेरिता शिष्यमण्डली Bm. 1. 648. -3 Walking round, circular motion. -4 Bent grass (दूर्वा). -**Comp.** -**अग्र** *a.* round-pointed. (-**ग्रः**) a bent or crooked sword, scimitar. (-**ग्रम्**) a surgeon's circular knife. -**अधिपः, -अधीशः, -ईशः, -ईश्वरः** 1 the ruler or governor of a district or province. -2 a king, sovereign. -**आवृत्तिः** *f.* circular movement; भ्रमिषु कृतपुटान्तर्मण्डलावृत्तिचक्षुः U. 3. 19. -**आसन** *a.* sitting in a circle. -**उत्तमम्** a principal kingdom or district. -**कविः** a bad poet. -**कार्मुक** *a.* having a circular bow. -**नाभिः** the centre of a circle. -**नृत्यम्** a circular dance, dance in a ring. -**न्यासः** describing a circle. -**पुच्छकः** a kind of insect. -**बन्धः** the formation of a circle or roundness. -**भागः** an arc. -**माडः** a pavilion. -**वटः** the fig-tree forming a circle. -**वर्तनम्** drawing figures with some powder (Mar. रांगोळी घालणें); संमार्जनोपलेपाभ्यां गृहमण्डलवर्तनैः Bhāg. 7. 11. 26. -**वर्तिन्** *m.* a ruler of a small province; स तुल्यातिशयध्वंसं यथा मण्डलवर्तिनाम् Bhāg. 11. 3. 20. -**वर्षः** rain over the whole of a king's territory, general rain-fall. -**वाटः** a garden.

**मण्डलकम्** 1 A circle, -2 A disc. -3 A district, province. -4 A group, collection. -5 A circular array of troops. -6 White leprosy with round spots. -7 A mirror. -8 A kind of pose of an archer. -9 A circle with lines drawn for magical incantations. -**कः** A dog.

**मण्डलयति** Den. P. 1 To make round or circular, form into a globe or circle. -2 To turn or whirl round; नानागतिर्मण्डलयन् जवेन Ki. 16. 44.

**मण्डलायते** Den. Ā. To form oneself into a circle, to coil oneself.

**मण्डलायित** *a.* Round, circular. -**तम्** A ball, globe.

**मण्डलिका** a group, troop, band, crowd.

**मण्डलित** *a.* Rounded, made round or circular.

**मण्डलिन्** *a.* [मण्डल-इनि] 1 Forming a circle, made up into a coil; बाता मण्डलिनस्तीव्रा व्यपसव्यं प्रचक्रमुः Rām. 6.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



107. 21. -2 Ruling a country. -*m.* 1 A particular kind of snake. -2 A snake in general. -3 A cat. -4 The pole-cat. -5 A dog. -6 The sun. -7 The fig-tree. -8 The ruler of a province.

**मण्डलीकः** A tributary king; तेजो निजं मुकुलयन्ति च मण्डलीकाः Kīr. K. 2. 111.

**मण्डलीकृ** 8 U. To form into a ring or circle, to coil round.

**मण्डलीकरणम्** Rounding, coiling.

**मण्डलीकृत** *p. p.* 1 Rounded, made circular, formed into a globe or circle. -2 Bent, curved (as a bow).

**मण्डलीभू** 1 P. 1 To become round. -2 To form a globe or circle.

**मण्डुकम्** The handle of a shield; स्यूते बाहौ मण्डुकश्लिष्टमुष्टेः Śi. 18. 21.

**मण्डूकः** [ मण्डयति वर्षासमयं, मण्ड् ऊकण् Uṇ. 4. 42. ] 1 A frog; निपानमिव मण्डूकाः सरोयोगं नरमायान्ति विवशाः सर्वसंपदः Subhāṣ. -2 N. of a particular breed of horses. -3 A machine like a frog. -4 The sole of a horse's hoof. **-कम्** A kind of coitus or mode of sexual enjoyment. **-की** 1 A female frog. -2 A wanton or unchaste woman. -3 N. of several plants. **-Comp.** **-अनुवृत्तिः, -गतिः, -प्लुतिः** *f.* 'the leap of a frog', skipping over or omitting at intervals (in grammar the word is used to denote the skipping of several Sūtras and supplying from a previous Sūtra ); क्रियाग्रहणं मण्डूकप्लुत्यानुवर्तते Sk. **-कुलम्** a collection of frogs. **-पर्णा, -पर्णिका, -पर्णी** N. of several plants like मञ्जिष्ठा, ब्राह्मी etc. **-योगः** a kind of abstract meditation in which the person who meditates sits motionless like a frog; मण्डूकयोगनियतैर्यथान्यायं निषेविभिः Mb. 13. 142. 9. **-सरस्** *n.* a pond full of frogs.

**मण्डूरम्** Rust of iron, dross (used as a tonic).

**मत** *p. p.* [ मन्-क्त ] 1 Thought, believed, supposed; स मे युक्ततमो मतः Bg. 6. 47. -2 Considered, regarded, deemed, looked upon. -3 Esteemed, honoured, respected; बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना R. 2. 16; 8. 8. -4 Commended, valued. -5 Conjectured, guessed. -6 Meditated upon, thought of, perceived, recognised. -7 Thought out. -8 Intended, aimed at. -9 Approved, sanctioned. -10 Wished or hoped for. -11 Perceived, observed, known, understood. ( See मन्). **-तम्** 1 A thought, idea, opinion, belief, view; निश्चितं मतमुत्तमम् Bg. 18. 6; केषांचिन्मतेन &c. -2 Doctrine, tenet, creed, religious belief; ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः Bg. 3. 31. -3 Advice, instruction, counsel. -4 Aim, design, intention, purpose; आत्मप्रभावेण मुने ज्ञातुमर्हसि मे मतम् Rām. 7. 9. 19. -5 Approbation, sanction, commendation. -6 Knowledge. **-Comp.** **-अक्ष** *a.* well-versed in playing at dice; कङ्को नाम द्विजो भूत्वा मताक्षः प्रियदेवनः Mb. 4. 1. 24. **-अनुज्ञा** one of the निग्रहस्थानs known in न्यायशास्त्र; Bhāṣā P.; admission of a fault in one's own reasoning, while insisting on a similar one in that of the opponent. **-अन्तरम्** 1 a different view. -2 a different creed. **-अवलम्बनम्** adopting or holding a particular opinion. **-भेदः** difference of opinion.

**मतङ्गः** [ माद्यति अनेन, मद्-अङ्गच् दस्य तः Tv. ] 1 An elephant. -2 A cloud. -3 N. of a sage; मतङ्गशापादवलेपमूलादवाप्तवानस्मि मतङ्गजत्वम् R. 5. 53. -4 The king त्रिशङ्कु; मतङ्गो धर्मात्मा राजर्षिर्व्याधतां गतः Mb. 1. 71. 31.

**मतङ्गजः** An elephant; न हि कमलिनीं दृष्ट्वा ग्राहमवेक्षते मतङ्गजः M. 3; Ki. 5. 47; R. 12. 73. **-जा** A particular मूर्च्छना in music.

**मतल्लिका** A word used at the end of nouns to denote 'excellence or anything best of its kind'; गोमतल्लिका 'an excellent cow'; परिलसत्तृणशून्यमतल्लिका Rām. Ch. 4. 32; cf. उद्घः.

**मतल्ली** See मतल्लिका.

**मतिः** *f.* [ मन् भावे क्तिन् ] 1 Intellect, understanding, sense, knowledge, judgment; मतिरेव बलाद्गरीयसी H. 2. 86; अल्पविषया मतिः R. 1. 2. -2 Mind, heart; मम तु मतिर्न मनागपैतु धर्मात् Bv. 4. 26; so दुर्मति, सुमति. -3 Thought, idea, belief, opinion, notion, supposition, impression, view; ध्रुवा नीतिर्मतिर्मम Bg. 18. 78; विधिरहो बलवानिति मे मतिः Bh. 2. 98; Pt. 2. 19. -4 Intention, design, purpose; see मत्या. -5 Resolution, determination. -6 Esteem, regard, respect; बहुमतिमधिकां ययावशोकः Ki. 10. 9. -7 Wish, desire, inclination; तस्य तासु मतिं ज्ञात्वा धर्मात्मा वाक्यमब्रवीत् Rām. 7. 25. 17; प्रायोपवेशनमतिर्नृपतिर्बभूव R. 8. 94. -8 Counsel, advice. -9 Remembrance, recollection. -10 Ved. Devotion, prayer. -11 An adviser. -12 =प्राणः q. v.; केन विज्ञानयोगेन मतिश्चित्तं समास्थिता Mb. 14. 21. 11 (com.). -13 Activity or disposition of the mind; न मतेर्मन्तारं मन्वीथाः Bṛi. Up. 3. 4. 2. -14 Blessing. ( मतिं कृ, -धा, -आधा 'to set the heart on', 'resolve upon', 'think of'. मत्या is used adverbially in the sense of 1 knowingly, intentionally, wilfully; मत्या भुक्त्वाचरेत् कृच्छ्रम् Ms. 4. 222; 5. 19. -2 under the impression that; व्याघ्रमत्या पलायन्ते ). **-Comp.** **-ईश्वरः** an epithet of Viśvakarman. **-कर्मन्** a matter of the intellect. **-गतिः** *f.* mode of thought. **-गर्भ** *a.* full of intelligence, intelligent, clever. **-दर्शनम्** the faculty of seeing into the thoughts (of others). **-द्वैधम्** difference of opinion. **-निश्चयः** a settled belief, firm conviction. **-पथः** the path of reflection. **-पूर्व** *a.* intentional, wilful. **-पूर्वम्, -पूर्वकम्** *ind.* purposely, intentionally, wilfully, willingly. **-प्रकर्षः** superiority of intellect, cleverness. **-भेदः** change of views. **-भ्रमः, -भ्रान्तिः, -विपर्यासः** 1 delusion, mental illusion, confusion of mind; स्वप्नो नु माया नु मतिभ्रमो नु Ś. 6. 9. -2 an error, a mistake, misapprehension. **-विभ्रमः, -विभ्रंशः** confusion or infatuation of mind, madness,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



frenzy. -शालिन् *a.* intelligent, clever. -हीन *a.* stupid, senseless, foolish.

**मतिमत्** *a.* Clever, intelligent; मतिमतां च विलोक्य दरिद्रताम् Bh. I. 91.

**मत्क** *a.* My, mine; संशृणुष्व कपे मत्कैः संगच्छस्व वनैः शुभैः Bk. 8. 16. -त्कः A bug.

**मत्कुणः** 1 A bug; मत्कुणाविव पुरा परिप्लवौ Śi. 14. 68. -2 An elephant without tusks. -3 A small elephant. -4 A beardless man. -5 A buffalo. -6 The cocoa-nut tree. -7 A flea. -णम् An armour for the legs or the thighs. -णी Pudendum (of a young girl, अजातलोमा). -Comp. -अरिः hemp. -गन्ध *a.* having the smell of a bug.

**मत्कोटकः** A termite (Mar. वाळवी).

**मत्त** *p. p.* [ मद्-क्त ] 1 Intoxicated, drunk, inebriated (fig. also); Ms. 11. 96; मत्तं प्रमत्तमुन्मत्तं ...... न रिपुं हन्ति धर्मवित् Bhāg. 1. 7. 36; ज्योत्स्नापानमदालसेन वपुषा मत्ताश्चकोराङ्गनाः Vb. 1. 11; प्रभामत्तश्चन्द्रो जगदिदमहो विभ्रमयति K. P. 10; so ऐश्वर्य°, धन°, बल° &c. -2 Mad, insane. -3 In rut, furious (as an elephant); जयश्रीरन्तरा वेदिर्मत्तवारणयोरिव R. 12. 93. -4 Proud, arrogant. -5 Delighted, overjoyed, excited with joy. -6 Amorous, sportive, wanton. -7 Excited by sexual desire. -त्तः 1 A drunkard. -2 A mad man. -3 An elephant in rut. -4 A cuckoo. -5 A buffalo. -6 The thorn-apple or Dhattūra plant. -त्ता Spirituous or vinous liquor. -Comp. -आक्रीडा N. of a metre; मत्ताक्रीडा म्रौ त्नौ नौ नलृगिति भवति वसुशरदशयतियुता V. Ratna. -आलम्बः a fence round a large building (as of a rich man). -इभः an elephant in rut. °गमना a woman having the gait of an elephant in rut, *e. g.* with a lounging gait. °विक्रीडितम् N. of a metre; सभरा म्नौ यलगास्त्रयोदशयतिर्मत्तेभविक्रीडितम् V. Ratna. -काशि (सि) नी a handsome and very fascinating woman; दर्शितोऽसौ चित्रपटस्तस्यै मत्तकाशिन्यै Dk. 2. 3. -कीशः an elephant. -गामिनी = 1 मत्तेभगमना above. -2 a bewitching or wanton woman. -दन्तिन् *m.*, -नागः an elephant in rut. -पालकः a drunken wretch; दास्याः पुत्र मत्तपालक कुतोऽत्र नवमालिका Nāg. 3. -मयूरः a wild or amorous peacock. (-रम्) a kind of metre; वेदैरन्ध्रैर्मत्तौ यसगा मत्तमयूरम् V. Ratna. -वारणः an elephant in rut; R. 12. 93. (-णः, -णम्) 1 a fence round a large building or mansion. -2 a turret or small room on the top of a large building. -3 a veranda. -4 a pavilion. -5 a peg or bracket. -6 a bed-stead. (-णम्) pounded betel-nuts.

**मत्तक** *a.* Somewhat drunk, intoxicated, or proud.

**मत्यम्** [ मते समीकरणे साधु यत् Tv. ] 1 A harrow. -2 The means of acquiring knowledge. -3 The exercise of knowledge. -4 Harrowing, making even or level (as a field).



**मत्सः** 1 A fish. -2 A lord of the Matsyas. -Comp. -गण्डः, -पठः a kind of fish-curry.

**मत्सर** *a.* [ मद्-सरन्; Uṇ. 3. 73 ] 1 Jealous, envious. -2 Insatiate, greedy, covetous. -3 Niggardly. -4 Wicked. -5 Selfish, self-interested. -6 Ved. Satisfying. -7 Intoxicating (Ved.). -रः 1 Envy, jealousy; अदत्तावकाशो मत्सरस्य K. 45; परवृद्धिषु बद्धमत्सराणाम् Ki. 13. 7; Śi. 9. 63; Ku. 5. 17; निन्दन्ति मां सदा लोका धिगस्तु मम जीवनम्। इत्यात्मनि भवेद्यस्तु धिक्कारः स च मत्सरः Kriyāyogasāra. -2 Hostility, enmity; स चापमुत्सृज्य विवृद्धमत्सरः R. 3. 60. -3 Pride; इति धौतपुरंध्रिमत्सरान् सरसि मज्जनेन Śi. 8. 71. -4 Covetousness, greediness. -5 Anger, passion. -6 The Soma. -रः, -रा A gnat. -री (In music) a particular मूर्च्छना.

**मत्सरिन्** *a.* [ मत्सर-इनि ] 1 Envious, jealous; परवृद्धिमत्सरि मनो हि मानिनाम् Śi. 15. 1; 2. 115; दुष्टात्मा परगुणमत्सरी मनुष्यः Mk. 9. 37; R. 18. 19. -2 Hostile, inimical. -3 Greedy of, selfishly addicted to (with loc.). -4 Wicked. -5 Ved. Intoxicating. -6 Satisfying.

**मत्सिन्** *a.* 1 Containing fish. -2 Marked by water (as a boundary).

**मत्स्यः** [ मद्-स्यन्; Uṇ. 4. 2 ] 1 A fish; शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः Ms. 7. 20. -2 A particular variety of fish. -3 A king of the Matsyas. -त्स्यौ (dual) The sign *Pisces* of the zodiac. -त्स्याः (pl.) N. of a country and its inhabitants, the country of Virāṭa q. v.; Ms. 2. 19. -Comp. -अक्षका, -अक्षी N. of a kind of Soma plant. -अद्, -अदन, -आद *a.* feeding on fish, a fish-eater. -अवतारः the first of the ten incarnations of Viṣṇu; (during the reign of the seventh Manu, the whole earth, which, had become corrupt was swept away by a flood, and all living beings perished except the pious Manu and the seven sages who were saved by Viṣṇu in the form of a fish); cf. Jayadeva's description of this *avatara.*; प्रलयपयोधिजले धृतवानसि वेदं विहितवहित्रचरित्रमखेदम्। केशव धृतमीनशरीर जय जगदीश हरे Gīt. 1. -अशनः 1 a king-fisher. -2 one who eats fish. -अशिक *a.* fish-eater; मत्स्याशिका त्वासिका Mk. 1. 23. -असुरः N. of a demon. -आधानी, -धानी a fish-basket (used by fishermen). -उदरिन् *m.* an epithet of Virāṭa. -उदरी an epithet of Satyavatī. -उदरीयः an epithet of Vyāsa. -उद्वर्तनम् a kind of dance; Dk. 2. 8. -उपजीविन् *m.*, -आजीवः a fisherman. -करण्डिका a fish-basket. -कीशः an elephant; Gīrvāṇa. -गन्ध *a.* having the smell of fish. (-न्धा) N. of Satyavatī. -घण्टः a kind of fish-sauce. -घातः 1 the killing or catching of fishes, the occupation of a fisherman; मत्स्यघातो निषादानाम् Ms. 10. 48. -2 a fisherman. -घातिन्, -जीवत्, -जीविन् *m.* a fisherman. -जालम् a fishing-net. -देशः the country of the Matsyas. -द्वादशी N. of the twelfth day in the month of मार्गशीर्ष. -नारी 'half-fish, half-woman', an epithet of Satyavatī. -नाशकः, -नाशनः an osprey.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**-पुराणम्** N. of one of the eighteen Purāṇas. **-पित्ता** Helleborus Niger (Mar. केदारकुटकी). **-बन्धः, -बन्धिन्** *m.* a fisherman; कदाचित्तं जलस्थायं मत्स्यबन्धाः समन्ततः Mb. 12. 137. 5. **-बन्धनम्** a fish-hook, an angle. **-बन्ध (न्धि) नी** a fish-basket. **-मांसम्** fish-flesh; द्वौ मासौ मत्स्यमांसेन Ms. 3. 268. **-रङ्कः, -रङ्गः, -रङ्ककः** a halcyon, king-fisher. **-राजः** 1 the Rohita fish. -2 N. of Virāṭa. **-वेधनम्, -वेधनी** an angle. **-वेधनी** a cormorant. **-व्रतिन्** one who lives in water. **-संघातः** a shoal of fish. **-सन्तानिकः** fish cooked with sauce; दग्धोऽङ्गारे सलवणो वेशवारैरुपस्कृतः। सार्द्रकः कटुतैलेन मत्स्यसन्तानिको भवेत् Śabdachandrikā.

**मत्स्यण्डिका, मत्स्यण्डी** Coarse or unrefined sugar; हीही इयं सीधुपानोद्वेजितस्य मत्स्यण्डिकोपनता M. 3; इक्षो रसो यः संपक्वो घनः किंचिद् द्रवान्वितः। मन्दवत् स्यन्दते यस्मान्मत्स्यण्डीति निगद्यते Bhāva. P.

**मत्स्यलम्** A kind of fish-curry.

**मथ्** See मन्थ्.

**मथ** = माथ q. v.

**मथन्** (मथ्ना instr. form) A piece of wood for producing fire by attrition.

**मथन** *a.* (**-नी** *f.*) [मथ् ल्यु ल्युट् वा] 1 Churning, stirring up. -2 Hurting, injuring. -3 Killing, destroying, a destroyer; मुग्धे मधुमथनमनुगतमनुसर राधिके Gīt. 2. -4 Rubbing. **-नः** N. of a tree (गणिकारिका, used in producing fire by attrition). **-नम्** 1 Churning, stirring round, agitating. -2 Rubbing, friction. -3 Injury, hurting, destruction. **-Comp. -अचलः, -पर्वतः** the mountain Mandara used as a churning-stick.

**मथिः** [मथ्-इ] A churning-stick.

**मथित** *p. p.* [मथ्-क्त] 1 Churned, stirred round, agitated, shaken about. -2 Crushed, ground, pinched. -3 Afflicted, distressed, oppressed. -4 Killed, destroyed. -5 Dislocated; (see मन्थ्). **-तम्** Pure butter-milk (without water).

**मथिन्** *m.* [मथ्-इनि] (Nom. sing. मन्थाः, acc. pl. मथः) 1 A churning-stick; मुहुः प्रणुन्नेषु मथां विवर्तनैर्नदत्सु कुम्भेषु मृदङ्गमन्थरम् Ki. 4. 16; N. 11. 62; 22. 44. -2 Wind. -3 A thunderbolt. -4 The penis.

**मथ्य** *a.* To be extracted or produced from; अमृतममरवर्या नाशयत्सिन्धुमथ्यम् Bhāg. 8. 12. 47.

**मथु (थू) रा** [मथ्-उ-ऊ-रच्] N. of an ancient town situated on the right bank of the Yamunā, the birth-place of Kṛiṣṇa and the scene of his amours and exploits; it is one of the seven sacred cities in India (see अवन्ति), and is, to this day, the favourite resort of thousands of devotees. It is said to have been founded by Śatrughna; निर्ममे निर्ममोऽर्थेषु मथुरां मधुराकृतिः R. 15. 28; कलिन्दकन्या मथुरां गताऽपि गङ्गोर्मिसंसक्तजलेव भाति 6. 48. **-Comp. -ईशः, -नाथः** epithets of Kṛiṣṇa.

**मद्** A form of the first personal pronoun in the singular number used chiefly at the beginning of comps.; as मदर्थे 'for me', 'for my sake'; मच्चित्त 'thinking of me'; मद्वचनम्, मत्संदेशः, मत्प्रियम् &c. &c.; मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु Bg. 18. 65.

**मल्लुः** A bear.

**मल्लूरः** Rust of iron.

**मव्** 1 P. (मवति) To fasten, bind.

**मवित** *p. p.* Bound, strung, tied.

**मव्य्** 1 P. (मव्यति) To bind.

**मश्** 1 P. (मशति) 1 To buzz, hum, make a sound. -2 To be angry.

**मशः** 1 A mosquito. -2 Hum, humming. -3 Anger. **-Comp. -हरी** a mosquito-curtain.

**मशकः** [ मश्-वुन् ] 1 A mosquito, gnat; सर्वं खलस्य चरितं मशकः करोति H. 1. 78; Ms. 1. 45. -2 A particular disease of the skin. -3 A leather water-bag. -4 N. of a district in Śākadvīpa inhabited by Kṣatriyas. -5 Gadfly, any fly that stings (दंशमशक); Mb. 3. 141. 27. **-की** A female mosquito; मंद्रेहे मशकीव मूषकवधूः...... Sūkti. 5. 19. **-Comp. -कुटिः, -टी** *f.*, **-वरणम्** a whisk for scaring away mosquitos. **-हरी** a mosquito-curtain.

**मशाकिन्** *m.* The *Udumbara* tree.

**मशानम्** Sound.

**मशी** See मसी.

**मशुनः** A dog.

**मष्** 1 P. (मषति) To hurt, injure, kill, destroy.

**मषिः, -षी** *f.* = मसी q. v.

**मस्** 4 P. (मस्यति) 1 To weigh, measure, mete. -2 To change form.

**मसः** A measure, weight.

**मसनम्** 1 Measuring, weighing. -2 A species of medicinal plant. -3 Hurting.

**मसरा** A kind of pulse.

**मसारः, मसारकः** An emerald; मसारताराक्षि ससारमात्मना N. 9. 104 and मसारमालावलितोरणं पुरम् ibid. 16. 122; चन्द्रमसारचितां श्रियम् Haravijaya 5. 47.

**मसिः** *m. f.* 1 Ink. -2 Lampblack, soot. -3 A black powder used to paint the eyes; अलैरुपात्तमषिभिः कुचकुङ्कुमानि (मृजन्त्यः) Bhāg. 10. 29. 29. **-Comp. -आधारः, -कूपी, -धानम्, -धानी, -मणिः** an ink-bottle, an ink-stand. **-जलम्** ink. **-पण्यः** a writer, scribe. **-पथः** a pen. **-प्रसूः** *f.* 1 a pen. -2 an ink-bottle. **-लेख्यदलः** a particular palm-leaf (for writing). **-वर्ण** *a.* black as ink, inky. **-वर्धनम्** myrrh.

**मसी** See मसि above. **-Comp. -कूर्चकः** an ink-brush. **-गुडिका** a blot of ink. **-जलम्** ink. **-धानी** an ink-stand. **-पटलम्** a coating of soot; शिरसि मसीपटलं दधाति दीपः Bv. 1. 74. **-भावुक** *a.* becoming as black as ink.

**मसी (षी) भू** To become black; स्वमसारतया मषीभवन्तः Śi. 20. 63.

**मसिकः** A serpent's hole.

**मसिन** *a.* Pounded, well-grounded. **-नम्** kinship through the right of presenting the पिण्ड to the common progenitor (सापिण्ड्य).

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मसीना** Linseed.

**मसु(सू)रः** 1 A kind of pulse. -2 A pillow. **-रा** 1 A lentil. -2 A harlot. **-Comp. -विदलः, -लम्** a split lentil; मसूरविदलाकारलूताक्लिन्नकलेवरः Raj. T. 6. 187.

**मसूरकः** A pillow. **-कम्** 1 A kind of ornament on Indra's banner. -2 A variety of pearls; Kau. A. 2. 11. 29. -3 A lintel, *i. e.* the piece of timber or stone that covers an opening and supports a weight above it; मसूरकमधिष्ठानं वस्त्वाधारं धरातलम् Kāmikāgama 55. 202.

**मसूरिका** 1 A kind of small-pox (erection of small pustules). -2 A mosquito-curtain. -3 A procuress, bawd.

**मसूरी** 1 A kind of small-pox. -2 Ipomoea Turpethum (Mar. तेंड, तिधारें).

**मसृणः** *a.* 1 Unctuous, oily; मसृणचन्दनचर्चिताङ्गीम् Ch. P. 7; or सरसमसृणमपि मलयजपङ्कम् Gīt. 4. -2 Soft, tender, smooth; अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः U. 1. 38. -3 Bland, mild, sweet; भण मसृणवाणि करवाणि चरणद्वयं सरसलसदलक्तकरागम् Gīt. 10. -4 Lovely, charming; विनयमसृणो वाचि नियमः U. 2. 2; 4. 21. -5 Beaming, glistening; मसृणमुकुलितानां प्रान्तविस्तारभाजाम् (आलोकितानाम्) Māl. 1. 27; 4. 2. **-णा** Linseed.

**मसृणयति** Den. P. To make soft or smooth.

**मसृणित** *a.* Softened, polished; एतस्मिन् मसृणितराजपट्टकान्ते U. 5. 18.

**मस्क्** 1 P. (मस्कति) To go, move.

**मस्करः** [मस्क्-अरच्] 1 A bamboo. -2 A hollow bamboo; सुस्तम्भां मस्करैर्दीर्घैः कृतवंशां सुशोभनाम् Rām. 3. 15. 21. -3 Going, motion. -4 Knowledge (ज्ञान).

**मस्करिन्** *m.* 1 An ascetic or religious mendicant, a Brāhmaṇa in the fourth order; धारयन् मस्करिव्रतम् Bk. 5. 63. -2 The moon.

**मस्ज्** 6 P. (मज्जति, मग्न; *caus.* मज्जयति; *desid.* मिमङ्क्षति) 1 To bathe, plunge, dip or throw oneself into water; यद्गोप्रतरकल्पोऽभूत् संमर्दस्तत्र मज्जताम् R. 15. 101; Bv. 2. 95. -2 To sink, sink into or down, sink under, plunge (with loc. or acc.); सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा U. 3. 38; Māl. 9. 20; सोऽसंवृतं नाम तमः सह तेनैव मज्जति Ms. 4. 81; R. 16. 72. -3 To be drowned, perish (in water). -4 To sink into misfortune. -5 To despond, be discouraged or disheartened. *-Caus.* (मज्जयति) 1 To cause to sink, immerse, dip, drown. -2 To deluge, inundate, overwhelm. -3 To thrust, to pass into; ततो मर्मसु मर्मज्ञो मज्जयन् निशितान् शरान् Rām. 6. 45. 15.

**मस्तम्** The head; मस्ते दुःसहवेदनाकवलिते Viś. Guṇa. 539. **-Comp. -दारुः** *n.* the *devadāru* tree. **-मूलकम्** the neck.

**मस्तकः, -कम्** [मस्यति परिमात्यनेन मस्-करणे त स्वार्थे क Tv.] 1 The head, skull; अतिलोभा (v. l. तृष्णा) भिभूतस्य चक्रं भ्रमति मस्तके Pt. 5. 22. -2 The head or top of anything, peak, summit; न च पर्वतमस्तके Ms. 4. 47; वृक्ष°, चुल्ली° &c. -3 The tuft of leaves growing at the top of palm trees. **-Comp. -आख्यः** the top of a tree. **-उद्भवः** the brain. **-ज्वरः, -शूलम्** an acute head-ache. **-पिण्डकः, -कम्** a round protuberance on the temples of an elephant in rut. **-मूलकम्** the neck. **-लुङ्गः** the membrane surrounding the brain. **-स्नेहः** 1 the brain. -2 an oily substance appearing on the head.

**मस्तिकम्** The head; see मस्तिष्क.

**मस्तिः** *f.* Measuring, weighing.

**मस्तिष्कम्** 1 The brain; महाहिमस्तिष्कविभेदमुक्तरक्तच्छटाचर्चितचण्डचञ्चुः (गरुत्मान्) Nāg. 4; Ve. 1. 27. -2 Any medicine acting upon the brain. **-Comp. -त्वच् *f.*** the membrane which surrounds the brain.

**मस्तु** *n.* 1 Sour cream. -2 Whey. **-Comp. -लुङ्गः, -गम्, -लुङ्गकः, -कम्** the brain.

**मह्** I. 1 P., 10 U. (महति, महयति-ते, महित) 1 To honour, respect, hold in great esteem, worship, revere, value greatly; गौसारं न निधीनां महयन्ति महेश्वरं विबुधाः Subhāṣ.; जयश्रीविन्यस्तैर्महित इव मन्दारकुसुमैः Gīt. 11; स्त्री पुमानित्यनास्थैषा वृत्तं हि महितं सताम् Ku. 6. 12; Ki. 5. 7, 24; Bk. 10. 2; R. 5. 25; 11. 49. -2 To delight, gladden. -3 To increase, aggrandize. -4 (Ātm.) To delight in; प्रशस्तिभिर्महयसे दिवे दिवे Rv. 6. 15. 2. -5 To be honoured. (Ved. in the last four senses.) II. 1 Ā. (महते) To grow or increase.

**महः** [मह्-घञर्थे क] 1 A festival, festive occasion; बन्धुताहृदयकौमुदीमहः Māl. 9. 21; U. 6. 40; स खलु दूरगतोऽप्यतिवर्तते महमसाविति बन्धुतयोदितैः Śi. 6. 19; मदनमहम् Ratn. 1. -2 An offering, a sacrifice. -3 A buffalo. -4 Light, lustre; cf. महस् also.

**महकः** 1 An eminent man. -2 A tortoise. -3 N. of Viṣṇu.

**महकः** A wide-spread fragrance.

**महत्** *a.* [मह्-अति] (compar. महीयस्; superl. महिष्ठ; nom. महान्, महान्तौ, महान्तः; acc. pl. महतः) 1 Great, big, large, huge, vast; महान् सिंहः, व्याघ्रः &c. -2 Ample, copious, abundant, many, numerous; महाजनः, महान् द्रव्यराशिः. -3 Long, extended, extensive; महान्तौ बाहू यस्य स महाबाहुः; so महती कथा, महानध्वा. -4 Strong, powerful, mighty; as महान् वीरः. -5 Violent, intense, excessive; महती शिरोवेदना, महती पिपासा. -6 Gross, thick, dense; महानन्धकारः. -7 Important, weighty, momentous; महत्कार्यमुपस्थितम्, महती वार्ता. -8 High, lofty, eminent, distinguished, noble; महत्कुलम्, महान् जनः. -9 Loud; महान् घोषः-ध्वनिः. -10 Early or late; महति प्रत्यूषे 'early in the morning'; महत्यपराह्णे 'late in the after-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



noon'. -11 High; महार्घ. -m. 1 A camel. -2 An epithet of Śiva. -3 (In Sāṅ. phil.) The great principle, the intellect (distinguished from मनस्), the second of the twenty-five elements or *tattvas* recognized by the Sāṅkhyas; Ms. 1. 15; 12. 14; महदाद्याः प्रकृतिविकृतयः सप्त Sāṅ. K. 3, 8, 22 &c. -4 The superior of a monastery. -n. 1 Greatness, infiniteness, numerousness. -2 Kingdom, dominion; 'महद्राज्यविशालयोः' Viśva; इन्द्रियाणि महत्प्रेप्सुः Mh. 5. 129. 26. -3 Sacred knoweldge. -4 The Supreme Being (परमात्मा); बुद्धेः परतरं ज्ञानं ज्ञानात् परतरं महत् Mb. 12. 204. 10. -*ind.* Greatly, excessively, very much, exceedingly; त्रैलोक्योद्वेगदं महत् Rām. 6. 111. 48. (*Note*: महत् as the first member of a Tatpuruṣa compound and a few other cases, remains unchanged, while in Karmadhāraya and Bahuvrīhi comp. it is changed to महा q. v.) -Comp. -आयुधम् a great weapon; नानाविधमहदायुधनैपुण्य......Dk. 1. 1. -आवासः a spacious or large building. -आशा a high hope; महदाशापूर्णमानसः Dk. 1. 3. -आश्चर्य *a.* very wonderful. -आश्रयः dependence on or seeking protection with the great. -उन्मदः a kind of fish; L. D. B. -ओषधिः *f.* a herb of wonderful power. On the Himālaya there are trees of the Devadāru family which have got resinous stems. These stems burn like oil-lamps. These sticks of pinewood, therefore, are the natural lamps of the Himālaya. cf. सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः। आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः॥ R. 4. 75; ज्वलितमहौषधिदीपिकासनाथम् R. 9. 70. -कथ *a.* talked of or mentioned by the great, in great men's mouths. -कार्तिकी full moon of Kārtika combined with the asterism Rohiṇī; L. D. B. -कुलम् a noble family. -कूपः a deep well. -क्षेत्र *a.* occupying a wide territory. -गदः fever. -जवः 1 Bos gavaeus. -2 a kind of antelope; L. D. B. -ज्यैष्ठी *f.* full-moon of ज्येष्ठ under certain combinations. -गुण *a.* having the qualities of the great. -तत्त्वम् the second of the 25 principles of the Sāṅkhyas. -दोष *a.* highly criminal; महादोषमबुद्धबोधनम् Kau. A. 1. 17. -द्वन्द्वः 1 loud uproar. -2 martial band of music; L. D. B. -फलः the Bilva tree; L. D. B. -बिलम् the atmosphere. -भद्रा the river Gaṅgā; L. D. B. -भीष्मः N. of Śantanu; L. D. B. -मण्डूकः a kind of yellow frog; L. D. B. -व्यतिक्रमः a great transgression. -सिंहः the lion of Durgā; L. D. B. -सिद्धिनिलयः a mosque (the word is used by परमानन्द in Śivabhārata 18. 52). -सेवा service of the great. -स्थानम् a high place, lofty station.

**महती** 1 A kind of lute. -2 N. of the lute of Nārada; अवेक्षमाणं महतीं मुहुर्मुहुः Śi. 1. 10. -3 The egg-plant. -4 Greatness, importance.

**महत्तर** *a.* Greater, larger &c. -रः 1 The principal, chief, or oldest person, the most respectable person; रघुकुलमहत्तराणां वधूः U. 4; गृहपतिश्च ममान्तरङ्गभूतो जनपदमहत्तरः Dk. -2 A chamberlain. -3 A courtier. -4 The head or the oldest man of a village.

**महत्तरकः** A courtier, chamberlain.

**महत्त्वम्** 1 Greatness, largeness, magnitude, great extent. -2 Mightiness, majesty. -3 Importance. -4 Exalted position, height, elevation. -5 Intensity, violence, high degree.

**महनीय** *a.* Worthy of honour, respectable, worthy, illustrious, glorious, noble, exalted; महनीयशासनः R. 3. 69; महनीयकीर्तेः 2. 25.

**महन्तः** The superior of a monastery.

**महर् (महस्)** *ind.* 1 The fourth of the seven worlds which rise one above the other from the earth (being between *svar* and *janas*); (महर्लोक also in this sense). -2 A kind of व्याहृति q. v.

**महल्लः, महल्लिकः** A eunuch in a king's harem (a word derived from Arabic); मुष्कशून्योऽनुपस्थो यः स्त्रीस्वभावो महल्लिकः Śabdamālā.

**महल्लक** *a.* Weak, feeble, old. -कः 1 A eunuch in a king's harem. -2 A large house, palatial building; (cf. Mar. महाल).

**महस्** *n.* [ मह्-असुन् ] 1 A festival, a festive occasion. -2 An offering, oblation, a sacrifice. -3 Light, lustre; कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते Māl. 1. 3; U. 4. 10; 5. 27. -4 The fourth of the seven worlds; see महर्. -5 A hymn of praise (Ved.). -6 Pleasure, enjoyment; जातमहाः स्तवनानि वसन्तः Rām. Ch. 4. 95; महोमहत्त्वं महनीयशीले विलासलोलेन विलोचनेन 6. 12. -7 Greatness, power. -8 Abundance, plenty. -9 Water.

**महसम्** 1 Knowledge. -2 Kind, sort, manner.

**महस्वत्, महस्विन्** *a.* 1 Splendid, bright, brilliant, luminous, lustrous. -2 Great, mighty.

**महा** A cow.

**महा** The substitute of महत् at the beginning of Karmadhāraya and Bahuvrīhi compounds, and also at the beginning of some other irregular words. (*Note*: The number of compounds of which महा is the first member is very large, and may be multiplied *ad infinitum*. The more important of them, or such as have peculiar significations, are given below.) -Comp. -अक्षः an epithet of Śiva. °पटलिक a chief keeper of archives. -अङ्ग *a.* huge, bulky. (-ङ्गः) 1 a camel. -2 a kind of rat. -3 N. of Śiva. -अञ्जनः N. of a mountain. -अत्ययः a great danger or calamity. -अध्वनिक *a.* 'having gone a long way', dead. -अध्वरः a great sacrifice. -अनसम् 1 a heavy carriage. -2 cooking utensils. (-सी) a kitchen-maid. (-सः, -सम्) a kitchen; सूपानस्य करिष्यामि कुशलोऽस्मि महानसे Mb. 4. 2. 2. -अनिलः a whirlwind; महानिलेनेव निदाघजं रजः Ki. 14. 59. -अनुभाव *a.* 1 of great prowess, dignified, noble, glorious, magna-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**-ग्रीविन्** *m.* a camel. **-घूर्णा** spirituous liquor. **-घृतम्** ghee kept for a long time (for medicinal purposes). **-घोष** *a.* noisy, loud-sounding. (**-षम्**) a market, fair. (**-षः**) a loud noise, clamour. **-चक्रम्** the mystic circle in the शाक्त ceremonial. **-चक्रवर्तिन्** *m.* a universal monarch. **-चण्डा** N. of Chāmuṇḍā. **-चपला** a kind of metre. **-चमूः** *f.* a large army. **-छायः** the fig-tree. **-जङ्घः** a camel. **जटः** an epithet of Śiva. **-जटा 1** a great braid of hair. **-2** the matted hair of Śiva. **-जत्रु** *a.* having a great collar-bone. (**-त्रुः**) an epithet of Śiva. **-जनः 1** a multitude of men, a great many beings, the general populace or public; महाजनो येन गतः स पन्थाः Mb. 3. 313. 117; आगम्य तु ततो राजा विसृज्य च महाजनम् 6. 98. 25. **-2** the populace, mob; विलोक्य वृद्धोक्षमधिष्ठितं त्वया महाजनः स्मेरमुखो भविष्यति Ku. 5. 70. **-3** a great man, a distinguished or eminent man; महाजनस्य संसर्गः कस्य नोन्नतिकारकः। पद्मपत्रस्थितं तोयं धत्ते मुक्ताफलश्रियम् Pt. 3. 60. **-4** the chief of a caste or trade. **-5** a merchant, tradesman. **-जवः** an antelope. **-जातीय** *a.* **1** rather large. **-2** of an excellent kind. **-जालिः, -ली** N. of a plant (Mar. सोनामुखी). **-जिह्वः** an epithet of Śiva. **-ज्ञानिन्** *m.* **1** a very learned man. **-2** a great sage. **-3** N. of Śiva. **-ज्यैष्ठी** the day of fullmoon in the month of Jyeṣṭha; ताभिर्दृश्यत एष यान् पथि महाज्यैष्ठीमहे मन्महे N. 15. 89; पूर्णिमा रविवारेण महाज्यैष्ठी प्रकीर्तिता Agni P. 121. 63. **-ज्योतिस्** *m.* an epithet of Śiva. **-ज्वरः** great affliction. **-ज्वाल** *a.* very brilliant or shining. (**-लः**) **1** N. of Śiva. **-2** a sacrificial fire. **-डीनम्** a kind of flight; 'यानं महाडीनमाहुः पवित्रामूर्जितां गतिम्' Mb. 8. 41. 27 (com.). **-तपस्** *m.* **1** a great ascetic. **-2** an epithet of Viṣṇu. **-तलम्** N. of one of the seven lower regions; see पाताल. **-तारा** N. of a Buddhist goddess. **-तिक्तः** the *Nimba* tree. **-तिथिः** the 6th day of a lunation. **-तीक्ष्ण** *a.* exceedingly sharp or pungent. (**-क्ष्णा**) the marking-nut plant. **-तेजस्** *a.* **1** possessed of great lustre or splendour. **-2** very vigorous or powerful, heroic. (*-m.*) **1** a hero, warrior. **-2** fire. **-3** an epithet of Kārtikeya. (*-n.*) quick-silver. **-त्याग, -त्यागिन्** *a.* very generous. (*-m.*) N. of Śiva. **-दंष्ट्रः** a species of big tiger. **-दन्तः 1** an elephant with large tusks. **-2** an epithet of Śiva. **-दण्डः 1** a long arm. **-2** a severe punishment. **-दम्भः** an epithet of Śiva. **-दशा** the influence exercised (over a man's destiny) by a predominant planet. **-दानम्** the gift of gold equal to one's own weight; अथातः संप्रवक्ष्यामि महादानस्य लक्षणम्. **-दारु** *n.* the *devadaru* tree. **-दुर्गम्** a great calamity; Pt. **-दूषकः** a kind of grain. **-देवः** N. of Śiva. (**-वी**) **1** N. of Pārvatī. **-2** the chief queen. **-द्रुमः** the sacred fig-tree. **-द्वारम्** a large gate, the chief or outer gate of a temple. **-धन** *a.* **1** rich. **-2** expensive, costly; हेमदण्डैर्महाधनैः Rām. 7. 77. 13. (**-नम्**) **1** gold. **-2** incense. **-3** a costly or rich dress. **-4** agriculture, husbandry. **-5** anything costly or precious. **-6** great booty. **-7** a great battle (Ved.). **-धनुस्** *m.* an epithet of Śiva. **-धातुः 1** gold. **-2** an epithet of Śiva. **-3** lymph. **-4** N. of Meru. **-धी** *a.* having a great understanding. **-धुर्यः** a full-grown draught ox. **-ध्वजः** a camel. **-ध्वनिक** *a.* dead. **-नग्नः** an athlete; Buddh. **-नटः** an epithet of Śiva; महानटः किं नु......तनोति ......साम्प्रतमङ्गहारम् N. 22. 7; महानटबाहुनेव बद्धभुजाङ्केन Vās. **-नदः** a great river. **-नदी 1** a great river, such as Gaṅgā, Kriṣṇā; मन्दरः पर्वतश्चाक्षो जङ्घा तस्य महानदी Mb. 8. 34. 20; संभूयाम्भोधिमभ्येति महानद्या नगापगा Śi. 2. 100. **-2** N. of a river falling into the bay of Bengal. **-नन्दा 1** spirituous liquor. **-2** N. of a river. **-3** ninth day of the bright half of the month of Māgha; माघमासस्य या शुक्ला नवमी लोकपूजिता। महानन्देति सा प्रोक्ता.... **-नरकः** N. of one of the 21 hells. **-नलः** a kind of reed. **-नवमी** the ninth day in the bright half of Āśvina, sacred to the worship of Durgā; ततोऽनु नवमी यस्मात् सा महानवमी स्मृता. **-नाटकम्** 'the great drama', N. of a drama, also called Hanumannāṭaka, (being popularly ascribed to Hanumat); thus defined by S. D. :— एतदेव यदा सर्वैः पताकास्थानकैर्युतम्। अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे॥ **-नाडी** sinew, tendon. **-नादः 1** a loud sound, uproar. **-2** a great drum. **-3** a thunder-cloud. **-4** a shell. **-5** an elephant. **-6** a lion. **-7** the ear. **-8** a camel. **-9** an epithet of Śiva. (**-दम्**) a musical instrument. **-नाम्नी 1** N. of a परिशिष्ट of Sāmaveda. **-2** (pl.) N. of 9 verses of Sāmaveda beginning with विदा मघवन् विदा. **-नायकः 1** a great gem in the centre of a string of pearls. **-2** a great head or chief. **-नासः** an epithet of Śiva. **-निद्र** *a.* fast asleep. (**-द्रा**) 'the great sleep', death. **-निम्नम्** intestines, abdomen. **-नियमः** an epithet of Viṣṇu. **-निर्वाणम्** total extinction of individuality (according to the Buddhists). **-निशा 1** the dead of night, the second and third watches of the night; महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम्. **-2** an epithet of Durgā. **-नीचः** a washerman. **-नील** *a.* dark-blue. (**-लः**) a kind of sapphire or emerald; इन्द्रनीलमहानीलमणिप्रवरवेदिकम् Rām. 5. 9. 16; महा-महानीलशिलारुचः Śi. 1. 16; 4. 44; R. 18. 42; Kau. A. 2. 11. 29. °उपलः a sapphire. **-नृत्यः, -नेत्रः** an epithet of Śiva. **-नेमिः** a crow. **-न्यायः** the chief rule. **-पक्ष** *a.* **1** having many adherents. **-2** having a large family or retinue; महापक्षे धनिन्यार्ये निक्षेपं निक्षिपेद् बुधः Ms. 8. 179. (**-क्षः**) **1** an epithet of Garuḍa. **-2** a kind of duck. (**-क्षी**) an owl. **-पङ्क्तिः, -पदपङ्क्तिः** a kind of metre. **-पञ्चमूलम्** the five great roots :— बिल्वोऽग्निमन्थः श्योनाकः काश्मरी पाटला तथा। सर्वैस्तु मिलितैरेतैः स्यान्महापञ्चमूलकम्॥ **-पञ्चविषम्** the five great or deadly poisons :— शृङ्गी च कालकूटश्च मुस्तको वत्सनाभकः। शङ्खकर्णीति योगोऽयं महापञ्चविषाभिधः॥ **-पटः** the skin. **-पथः 1** chief road, principal street, high or main road; संतानकाकीर्णमहापथं तत् Ku. 7. 3. **-2** the passage into the next world, *i. e.* death. **-3** N. of certain mountain-tops from which devout persons used to throw themselves down to secure entrance into heaven. **-4** an epithet of Śiva. **-5** the long pilgrimage to mount Kedāra. **-6** the way to heaven. **-7** the knowledge of the

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



a fabulous animal called शरभ q. v. **-मन्त्रः** 1 any sacred text of the Vedas. -2 a great or efficacious charm, a powerful spell. **-मन्त्रिन्** *m.* the prime-minister, premier. **-मयूरी** N. of Buddhist goddess. **-मलहारी** a kind of Rāgiṇī. **-महः** a great festive procession; Sinhās. **-महस्** *n.* a great light (seen in the sky). **-महोपाध्यायः** 1 a very great preceptor. -2 a title given to learned men and reputed scholars; *e. g.* महामहोपाध्यायमल्लिनाथसूरि &c. **-मांसम्** 'costly flesh', especially human flesh; न खलु महामांसविक्रयादन्यमुपायं पश्यामि Mal. 4; अशस्त्रपूतं निर्व्याजं पुरुषाङ्गोपकल्पितम्। विक्रीयते महामांसं गृह्यतां गृह्यतामिदम् 5. 12 (see Jagaddhara *ad loc.*). **-माघी** the full-moon day in the month of Māgha. **-मात्र** *a.* 1 great in measure, very great or large. -2 most excellent, best; श्रेष्ठयन्धकमहामात्रैः सह Mh. 1. 221. 27; 5. 22. 37. (**-त्रः**) 1 a great officer of state, high state-official, a chief minister; (मन्त्रे कर्मणि भूषायां वित्ते माने परिच्छदे। मात्रा च महती येषां महामात्रास्तु ते स्मृताः॥); Ms. 9. 259; गूढपुरुषप्रणिधिः कृतमहामात्रापसर्पः (v. l. महामात्यापसर्पः) पौरजानपदानपसर्पयेत् Kau. A. 1. 13. 9; Rām. 2. 37. 1. -2 an elephant-driver or keeper; मदोन्मत्तस्य भूपस्य कुञ्जरस्य च गच्छतः। उन्मार्गं वाच्यतां यान्ति महामात्राः समीपगाः॥ Pt. 1. 161. -3 a superintendent of elephants. (**-त्री**) 1 the wife of a chief minister. -2 the wife of a spiritual teacher. **-मानसी** N. of a Jain goddess. **-मान्य** *a.* being in great honour with; मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः Bv. 1. 6. **-मायः** 1 an epithet of Śiva. -2 of Viṣṇu. **-माया** 1 worldly illusion, which makes the material world appear really existent. -2 N. of Durgā; महामाया हरेश्चैषा यया संमोह्यते जगत् Devīmāhātmya. **-मायूरम्** a particular drug. (**-री**) N. of an amulet and a goddess; Buddh. **-मारी** 1 cholera, an epidemic. -2 an epithet of Durgā. **-मार्गः** high road, main street. °पतिः a superintendent of roads. **-मालः** N. of Śiva. **-माहेश्वरः** a great worshipper of Maheśvara or Śiva. **-मुखः** a crocodile. **-मुद्रा** a particular position of hands or feet (in practice of yoga). **-मुनिः** 1 a great sage. -2 N. of Vyāsa. -3 an epithet of Buddha. -4 of Agastya. -5 the coriander plant. (**-नि** *n.*) 1 coriander seed. -2 any medicinal herb or drug. **-मूर्तिः** N. of Viṣṇu. **-मूर्धन्** *m.* an epithet of Śiva. **-मूलम्** a large radish. (**-लः**) a kind of onion. **-मूल्य** *a.* very costly. (**-ल्यः**) a ruby. **-मृगः** 1 any large animal. -2 an elephant, -3 the fabulous animal called शरभ. **-मृत्युः, -मेघः** N. of Śiva. **-मृत्युंजयः** a kind of drug. **-मृधम्** a great battle. **-मेदः** the coral tree; महामेदाभिधो ज्ञेयः Bhāva. P. **-मेधा** an epithet of Durgā. **-मोहः** great infatuation or confusion of mind. (ससर्ज) महामोहं च मोहं च तमश्चाज्ञानवृत्तयः Bhāg. 3. 12. 2. (**-हा**) an epithet of Durgā. **-यज्ञः** 'a great sacrifice', a term applied to the five daily sacrifices or acts of piety to be performed by a house-holder; अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्। होमो दैवो (or देवयज्ञः) बलिर्भौतो (or भूतयज्ञः) नृयज्ञोऽतिथिपूजनम्॥ Ms. 3. 70, 71, (for explanation, see the words s. v.). -2 N. of Viṣṇu. **-यमकम्** 'a great *Yamaka*', *i. e.* a stanza all the four lines of which have exactly the same words, though different in sense; *e. g.* see Ki. 15. 52, where विकाशमीयुर्जगतीशमार्गणाः has four different senses; cf. also बभौ मरुत्वान् विकृतः समुद्रः Bk. 10. 19. **-यशस्** *a.* very famous, renowned, celebrated. **-यात्रा** 'the great pilgrimage', the pilgrimage to Benares. **-यानम्** N. of the later system of Buddhist teaching, firstly promulgated by Nāgārjuna (opp. हीनयान). **-याम्यः** an epithet of Viṣṇu. **-युगम्** 'a great Yuga', consisting of the four *Yugas* of mortals, or comprising 4,320,000 years of men. **-योगिन्** *m.* 1 an epithet of Śiva. -2 of Viṣṇu. -3 a cock. **-योनिः** *f.* excessive dilation of the female organ. **-रक्तम्** coral. **-रङ्गः** a large stage. **-रजतम्** 1 gold; उच्चैर्महारजतराजिविराजितासौ Śi. 4. 28. -2 the thorn-apple. **-रजनम्** 1 safflower. -2 gold. -3 turmeric; तस्य हैतस्य पुरुषस्य रूपं यथा महारजनं वासः Bri. Up. 2. 3. 6. **-रत्नम्** a precious jewel; वज्रं मुक्ता प्रवालं च गोमेदश्चेन्द्रनीलकः॥ वैडूर्यः पुष्करागश्च पाचिर्माणिक्यमेव च। महारत्नानि चैतानि नव प्रोक्तानि सूरिभिः॥ Śukra. 4. 155-56. **-रथः** 1 a great chariot. -2 a great warrior or hero; द्रुपदश्च महारथः Bg. 1. 4; कुतः प्रभावो धनंजयस्य महारथजयद्रथस्य विपत्तिमुत्पादयितुम् Ve. 2; दशरथः प्रशशास महारथः R. 9. 1; Śi. 3. 22; (a महारथ is thus defined:— एको दशसहस्राणि योधयेद्यस्तु धन्विनाम्॥ शस्त्रशास्त्रप्रवीणश्च विज्ञेयः स महारथः॥). -3 desire, longing; cf. मनोरथ. **-रवः** a frog. **-रस** *a.* very savoury. (**-सः**) 1 a sugar-cane. -2 quicksilver. -3 a precious mineral. -4 the fruit of the date tree. -5 any one of the eight substances given below:— दरदः पारदं शस्यं वैक्रान्तं कान्तमभ्रकम्। माक्षिकं विमलश्चेति स्युरेतेऽष्टौ महारसाः॥ (**-सम्**) sour ricewater. **-राजः** 1 a great king, sovereign or supreme ruler; पद्माशल्लक्षपर्यन्तो महाराजः प्रकीर्तितः Śukra. 1. 184. -2 a respectful mode of addressing kings or other great personages (my lord, your majesty, your highness); इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः Mb. -3 a deified Jaina teacher. -4 a fingernail. °अधिराजः a universal emperor, paramount sovereign. °चूतः a kind of mango tree. **-राजिकः** N. of Viṣṇu. **-राजिकाः** (*m.* pl.) an epithet of a class of gods (said to be 220 or 236 in number.). **-राज्यम्** the rank or title of a reigning sovereign. **-राज्ञी** 1 the reigning or chief queen, principal wife of a king. -2 N. of Durgā. **-रात्रम्** midnight, dead of night. **-रात्रिः, -त्री** *f.* 1 see महाप्रलय; ब्रह्मणश्च निपाते च महाकल्पो भवेन्नृप। प्रकीर्तिता महारात्रिः. -2 midnight. -3 the eighth night in the bright half of Āśvina. **-राष्ट्रः** 'the great kingdom', N. of a country in the west of India, the country of the Marāṭhās. -2 the people of Mahārāṣṭra, the Marāṭhās (pl.). (**-ष्ट्री**) N. of the principal Prākṛita dialect, the language of the people of the Mahārāṣṭra; cf. Daṇḍin:— महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः Kāv. 1. 34. **-रिष्टः** a kind of Nimba tree growing on mountains. **-रुज्, -ज** *a.* very painful. **-रुद्रः** a form of Śiva.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



of Aruṇa. **–साहसम्** great violence or outrage, great audacity. **–साहसिकः** a dacoit, highwayman, a daring robber. **–सिंहः** the fabulous animal called Śarabha. **–सिद्धिः** *f.* a kind of magical power. **–सुखम्** 1 great pleasure. –2 copulation. (**–खः**) a Buddha. **–सुगन्धम्** a fragrant unguent. **–सुगन्धिः** a kind of antidote. **–सुधा** silver; Gīrvāṇa. **–सुभिक्षम्** good times. **–सूक्तः** the composer of the great Sūktas or hymns of the 10th Maṇḍala of the Ṛigveda. **–सूक्ष्मा** sand. **–सूतः** a military drum. **–सेनः** 1 an epithet of Kārtikeya; महासेनप्रसूति तदयौ शरवणं महत् Rām. 7. 16. 1. –2 the commander of a large army. (**–ना**) a great army. **–स्कन्धः** a camel. **–स्थली** the earth. **–स्थानम्** a great position. **–स्नेहः** a combination of the 4 kinds of fat. **–स्मृतिः** the Saḍaṅgas and Smṛitis; महास्मृतिं पठेयस्तु तथैवानुस्मृतिं शुभाम् Mb. 12. 200. 30. **–स्रोतस्** *n.* the bowels. **–स्रग्विन्** *m.* an epithet of Śiva. **–स्वनः** a kind of drum. **–हंसः** an epithet of Viṣṇu. **–हविस्** *n.* clarified butter. **–हस्तः** an epithet of Śiva. **–हासः** a loud or boisterous laughter, cachinnation. **–हिमवत्** *m.* N. of a mountain. **–ह्रस्वा** N. of a plant (Mar. कुहिली).

**महि** *m.*, *n.* Greatness; सर्वात्मना महि गृणामि यथामनीषम् Bhāg. 7. 9. 12. *–m.* Intellect. *–f.*= मही The earth. *–ind.* Greatly, very much.

**महिका** 1 Frost, mist. –2 The earth. **–Comp. –अंशुः** the moon.

**महित** *p. p.* Honoured, worshipped, esteemed, revered; see मह्; रम्या सा रोमराजिर्महितरुचिमती Viṣṇupāda. S. 26. **–तम्** The trident of Śiva.

**महित्वम्** Greatness, might; द्रष्टुं मञ्जुमहित्वमन्यदपि तद्वत्सानितो वत्सपान् Bhāg. 10. 13. 15.

**महिनम्** Sovereignty, dominion.

**महिधकः** 1 A rat. –2 An ichneumon. –3 The string of a pole for carrying loads.

**महिमन्** *m.* [ महत् इमनिच् टिलोपः ] 1 Greatness (fig. also); अयि मलयज महिमायं कस्य गिरामस्तु विषयस्ते Bv. 1. 11; अधोऽधः पश्यतः कस्य महिमा नोपचीयते H. 2. 2. –2 Glory, majesty, might, power; तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन् Ku. 2. 6; U. 4. 21. –3 High rank, exalted rank or position, dignity. –4 Personage (विभूति); महिमान एवैषाम् Bṛi. Up. 3. 9. 2. –5 One of the 8 *Siddhis*, the power of increasing size at will; see सिद्धि.

**महिरः** 1 The sun; (see मिहिर) –2 The Arka plant.

**महिला** [ मह्-इलच् Uṇ. 1. 54 ] 1 A woman; तवैतद्वक्षोजद्वितयमरविन्दाक्षमहिले Lakṣmīlaharī S. 22. –2 An amorous or intoxicated woman; विरहेण विकलहृदया निर्जलमीनायते महिला Bv. 2. 68. –3 The creeper called Priyaṅgu. –4 A kind of perfume of fragrant plant (रेणुका). **–Comp. –आह्वया** the Priyaṅgu creeper; कान्ता लता महिलाह्वया.

**महिलारोप्यम्** N. of a city in the south.

**महिषः** [ मह्-टिषच् Uṇ. 1 45 ] 1 A buffalo (considered as the vehicle of Yama); गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताडितम् Ś. 2. 6. –2 N. of a demon killed by Durgā. **–Comp. –अक्षः, –अक्षकः** a kind of bdellium. **–अर्दनः** an epithet of Kārtikeya. **–असुरः** the demon Mahiṣa. °घातिनी, °मथनी, °मर्दनी, °सूदनी epithets of Durgā. **–घ्नी** an epithet of Durgā. **–ध्वजः** an epithet of Yama; N. of a Jain monk. **–पालः, –पालकः** a buffalo-keeper. **–मर्दिनी** N. of Durgā. **–वहनः, –वाहनः** epithets of Yama; कृतान्तः किं साक्षान्महिषवहनोऽसाविति पुनः K. P. 10.

**महिषित** *a.* Changed into a buffalo; Kāv.

**महिषी** 1 A she-buffalo, buffalo-cow; Ms. 9. 55; माषानष्टौ तु महिषी सस्यघातस्य कारिणी Y. 2. 159. –2 The principal queen, queen-consort; महिषीसखः R. 1. 48; 2. 25; 3. 9. –3 A queen in general. –4 The female of a bird; सासज्जत शिचस्तन्त्यां महिषी कालयन्त्रिता Bhāg. 7. 2. 52. –5 A lady's maid, female servant (सैरन्ध्री). –6 An immoral woman. –7 Money acquired by the prostitution of one's wife; cf. माहिषिक. **–Comp. –पालः** a keeper of she-buffaloes. **–स्तम्भः** a pillar adorned with a buffalo's head.

**महिष्मत्** *a.* Possessing, rich or abounding in, buffaloes.

**महिष्ठ** *a.* Greatest, largest (superl. of महत् q. v.); नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः Śiva-mahimna 29.

**मही** 1 Earth; as in महीपाल, महीभृत् &c.; मही रम्या शय्या Bh. 3. 79. –2 Ground, soil; चेरतुः संयुगमहीं सासारौ जलदाविव Rām. 6. 107. 34. –3 Landed property or estate, land. –4 A country, kingdom. –5 N. of a river falling into the gulf of Cambay. –6 (In geom.) The base of any plane figure. –7 A large army (Ved). –8 A cow; ŚB. on MS. 10. 3. 49. –9 Earth (as a substance, stones, bricks &c); Ms. 7. 70. –10 Space. **–Comp. –इनः, –ईश्वरः** a king; न न महीनमहीनपराक्रमम् R. 9. 5. **–कम्पः** an earthquake. **–क्षित्** *m.* a king, sovereign; भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् Bg. 1. 25; R. 1. 11, 85; 19. 20. **–जः** 1 the planet Mars; इयं महीजे विधुजे शराष्टौ Samayapradīpa. –2 N. of Narakāsura. –3 a tree. (**–जा**) N. of Sītā. (**–जम्**) wet ginger. **–जीवा** the horizon. **–तलम्** surface of the earth. **–दुर्गम्** an earth fort; Ms. 7. 70. **–धरः** 1 a mountain; महीधरं मार्गवशादुपेतम् R. 6. 52; Ku. 6. 89. –2 an epithet of Viṣṇu. **–ध्रः** 1 a mountain; महीध्राद्युत्तुङ्गादवनिमवनेश्चापि जलधिम् Bh. 2. 10; Śi. 15. 54; R. 3. 60; 13. 7. –2 a symbolical expression for the number, 'seven'. –3 an epithet of Viṣṇu. **–नाथः, –पः, –पतिः, –पालः, –पुरन्दरः, –भुज्** *m.*, **–मघवन्** *m.*, **–महेन्द्रः** a king; अलं महीपाल तव श्रमेण R. 2. 34; तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः 6. 12; प्रविश्य कृष्णासदनं महीभुजा Ki. 1. 26; also Sāhendra. 2. 82. **–पतनम्** humble obeisance (as by falling on the ground.) **–पुत्रः, –सुतः,**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**–सुतः** 1 the planet Mars; तनयकृताश्च शुचो महीसुते Bri. S. **–2** epithets of the demon Naraka. **–पुत्री, –सुता** an epithet of Sitā. **–पृष्ठम्** the surface of the earth. **–प्रकम्पः** an earthquake. **–प्ररोहः, –रुह् m., –रुहः** a tree; अकुसुमान् दधतं न महीरुहः Ki. 5. 10; Śi. 20. 49. **–प्राचीरम्, –प्रावरः** the sea. **–भर्तृ** m. a king. **–भृत्** m. 1 a mountain; अथ जयाय नु मेरुमहीभृतः Ki. 5. 1. –2 a king, sovereign. **–मण्डलम्** 1 the circumference of the earth. –2 the whole earth. **–लता** an earthworm. **–सुरः** a Brāhmaṇa.

**महीकृ** ( महीकरोति ) To make great, exalt.

**महीयते** Den. Ā. ( rarely P. ) 1 To be glad, happy or prosperous ( Ved. ). –2 To rise to a high position, thrive, prosper. –3 To be highly respected or honoured; सरस्वती श्रुतमहतां महीयताम् Ś. 7. 35.

**महीयस्** a. Greater, larger, more powerful or weighty or important, mightier, stronger ( compar. of महत् q. v. ). –m. A great or nobleminded man; अणोरणीयान् महतो महीयान् Kaṭh. 1. 2. 20; प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया Ki. 2. 21; Śi. 2. 13.

**महीला, महेला, महेलिका** A woman, female; चारु चचार सरःसु विराजत् काकलिका कलहंसमहेला Rām. Ch. 4. 98.

**1 मा** ind. A particle of prohibition ( rarely of negation ) usually joined with the Imperative; मद्वाणि मा कुरु विषादमनादरेण Bv. 4. 41; also ( a ) with the Aorist, when the augment अ is dropped; क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते Bg. 2. 3; पापे रतिं मा कृथाः Bh. 2. 77; मा भूमुहत् खलु भवन्तमनन्यजन्मा मा ते मलीमसविकारघना मतिर्भूत् Māl. 1. 32; the अ is sometimes retained; मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः Rām. ( b ) the Imperfect ( the augment being dropped here also ); मा चैनमभिभाषथाः Rām. 1. 2. 15; ( c ) the Future, or Potential mood, in the sense of 'lest', 'that not'; लघु एनां परित्रायस्व मा कस्यापि तपस्विनो हस्ते पतिष्यति Ś. 2; मा कश्चिन्ममाप्यनर्थो भवेत् Pt. 5; मा नाम देव्याः किमप्यनिष्टमुत्पन्नं भवेत् K. 307; the Imperative mood also is sometimes used for the Potential; त्वरतामार्यपुत्र एतां समाश्वासयितुं मास्या विकारो वर्धताम् M. 4. ( d ) the Present Participle when a curse is implied; मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति Śi. 2. 45; or ( e ) with Potential passive participles; मैवं प्रार्थ्यम्. मा is sometimes used without any verb; मा तावत् 'oh! do not ( say or do ) so'; मा मैवम्; मा नाम रक्षिणः Mk. 3 'may it not be the police'; see under नाम. Sometimes मा is followed by स्म and is used with the Aorist or Imperfect with the augment dropped, and rarely with the Potential mood; क्लैब्यं मा स्म गमः पार्थ Bg. 2. 3; मा स्म प्रतीपं गमः Ś. 4. 17; मा स्म सीमन्तिनी काचिज्जनयेत् पुत्रमीदृशम्. **–Comp. –चिरम्, –विलम्बम्, –विलम्बितम्** ind. without delay, shortly, quickly; अमात्यान् वृष्णिवीराणां द्रष्टुमिच्छामि माचिरम् Mb. 16. 7. 6.

**2 मा** 1 The goddess of wealth, Lakṣmī; तमालपत्रं राजेन्द्र भज माज्ञानदायकम् Subhāṣ. –2 A mother. –3 A measure. **–Comp. –पः, –पतिः, वरः** epithets of Viṣṇu; हाटकनिभपीताम्बर अभयं कुरु मे मावर Nārāyaṇa. 5. 13.

**3 मा** 2 P., 3, 4 Ā. ( माति, मिमीते or मीयते, मित ) 1 To measure; न्यधित मिमान इवावनिं पदानि Śi. 7. 13; 9. 2. –2 To measure or mark off, limit; see मित. –3 To compare with ( in size ), measure by any standard; पुरः सखीनाममिमीत लोचने Ku. 5. 15. –4 To be in, find room or space in, be contained or comprised in; तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः Śi. 1. 23; वृद्धिं गतेऽप्यात्मनि नैव मान्तीः 3. 73; 10. 50; 14. 75; 13. 2; 5. 44; माति मातुमशक्योऽपि यशोराशिर्यदत्र ते K. P. 10. –5 To prepare, arrange. –6 To infer, conclude. –7 To form, make, build, construct. –8 To assign, mete out, apportion. –9 To show, display. –10 To roar, sound. –*Caus.* ( मापयति-ते ) To cause to be measured, measure or mete out; एतेन मापयति भित्तिषु कर्ममार्गम् Mk. 3. 16. –*Desid.* ( मित्सति-ते ) To wish to measure &c.

**मांस्** n. 1 Flesh. ( This word has no forms for the first five inflections, and is optionally substituted for मांस after acc. dual ).

**मांसम्** [ मन्-स दीर्घश्च Uṇ. 3. 64 ] Flesh, meat; समांसो मधुपर्कः U. 4. ( The word is thus fancifully derived in Ms. 5. 55:— मां स भक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम्। एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः॥ ). –2 The flesh of fish. –3 The fleshy part of a fruit. **–सः** 1 A worm. –2 N. of a mixed tribe, selling meat. –3 Time. **–Comp. –अद्, –अद, –आदिन्, –भक्षक** a. flesh-eating, carnivorous ( as an animal ); अद्य तर्प्स्यन्ति मांसादाः Bk. 16. 29; Ms. 5. 15. **–अरिः** N. of a plant ( Mar. चुका ). **–अर्गलः, –लम्** a piece of flesh hanging down from the mouth. **–अर्बुदः, –दम्** a kind of disease of the membrum virile. **–अशनम्** 1 flesh-meat. –2 flesh-eating. **–अष्टका** N. of the eighth day in the dark half of Māgha. **–आहारः** animal food. **–इष्टा** a kind of bird ( वल्गुला ). **–उपजीविन्** m. a dealer in flesh. **–ओदनः** 1 a meal of flesh. –2 rice boiled with flesh. **–कच्छपः** a fleshy abscess on the palate. **–कन्दी** a swelling of the flesh. **–कामः** fond of flesh; P. III. 2. 1; Vār. 7. **–कारिन्** n. blood. **–कीलः** a tumour, wart. **–क्षयः** the body. **–ग्रन्थिः** a gland. **–जम्, –तेजस्** n. fat, adeps. **–तानः** a polypus in the throat. **–दृश्** a. seeing superficially ( चर्मचक्षुस् ); मा प्रत्यक्षं मांसदृशां कृपीष्ठाः Bhāg. 10. 3. 28. **–द्राविन्** m. a kind of sorrel. **–निर्यासः** the hair of the body. **–पः** a Piśācha or demon. **–पचनम्** a vessel for cooking meat. **–परिवर्जनम्** abstaining from flesh; न तत्फलमवाप्नोति यन्मांसपरिवर्जनात् Ms. 5. 54. **–पाकः** kind of disease ( destroying the membrum virile ). **–पिटकः, –कम्** 1 a basket of flesh. –2 a large quantity of flesh. **–पित्तम्, –लिप्तम्** a bone. **–पेशी** 1 a muscle. –2 a piece of flesh. –3 an epithet of the foetus from the 8th to the 14th

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



day. -प्ररोहः a fleshy excrescence. -फला the egg plant. -भेत्तृ, -भेदिन् a. cutting the flesh; Ms. 8. 284. -मासा N. of a plant (Mar. रानउडीद, माषपर्णी). -योनिः a creature of flesh and blood. -रसः 1 soup. -2 blood. -रोहिणी N. of a fragrant medicinal plant. -लता a wrinkle. -विक्रयः sale of meat. -शोणित a. flesh and blood; मांसशोणितभोजने. -सारः, -स्नेहः fat. -हासा skin.

**मांसल** a. [ मांस-लच्; cf. अंसल ] 1 Fleshy. -2 Muscular, lusty, brawny; U. 1. -3 Fat, strong, powerful; शाखाः शतं मांसलाः Bv. 1. 34. -4 Deep (as sound); ध्वनिश्च माङ्गल्यमृदङ्गमांसलः U. 6. 25; प्रतिभिन्नपुष्करावर्तकस्तनितमांसलो वाङ्निर्घोषः Mv. 2. -5 Increased in bulk or quantity; Māl. 9. 13; हृदस्य हंसावलिमांसलश्रियः N. -6 Pulpy (as fruit). -7 Dense, thick.

**मांसिकः** [ मांसं पण्यमस्य ठक् ] A butcher.

**मांसिका, -मांसिनी, -मांसी** Nardostachys Jatāmansi (जटामांसी).

**मांसीयते** Den. P. To hanker after flesh, to be greedy of flesh; शिष्टविगर्हणं लभेत कृते श्रुत्यर्थे मांसीयन् पशून् हन्तीति ŚB. on MS. 11. 1. 43.

**माकन्दः** The mango tree; माकन्द न प्रपेदे मधुपेन तवोपमा जगति Bv. 1. 29; माकन्दकन्दकान्ताऽधरधरणितल्पम् Git. -न्दी 1 The myrobalan tree. -2 Yellow sandal. -3 N. of a city on the Ganges.

**माकर** a. (-री f.) Belonging to the sea-monster, Makara q. v. -री N. of the seventh day in the bright half of Māgha; तन्मे रोगं च शोकं च माकरी हन्तु सप्तमी Tithyādi. -Comp. -आकरः the sea. -आसनम् a particular posture in sitting. -व्यूहः a particular form of military array.

**माकरन्द** a. (-न्दी f.) Derived from, relating to, the juice of flowers; full of or mixed with honey; प्रचलित इव सान्द्रो माकरन्दः परागः Māl. 8. 1 (v. l.); 9. 13.

**माकलिः** 1 N. of Mātali, the charioteer of Indra. -2 The moon.

**माकारध्यानम्** A particular mothod of abstract meditation.

**माकुलिः** A kind of snake.

**माक्षि (क्षी) क** a. (-की f.) Coming or derived from a bee. -कम् [ मक्षिकाभिः संभृत्य कृतम् अण् ] 1 Honey; दुर्वैरपि माधुर्यैर्द्राक्षाक्षीरेक्षुमाक्षिकसुधानाम् Bv. 4. 43. -2 A kind of honey-like mineral substance; माक्षीकधातुमधुपारदलोहचूर्ण Rāja. T. -कः 1 A spider. -2 Honey. -3 Pyrites. -Comp. -आश्रयम् 1 bees'-wax. -2 honey-comb. -जम् bees'-wax. -धातुः pyrites. -फलः a kind of cocoa-nut. -शर्करा candied sugar.

**माख** a. (-खी f.) Sacrificial.

**मागध** a. (-धी f.) [ मगधदेशे भवः अण् ] Relating to living in the country of Magadha or the people of Magadha. -धः 1 A king of the Magadhas. -2 N. of a mixed tribe, said to have been the offspring of a Vaiśya father and a Kṣatriya mother, (the duty of the members of this caste being that of professional bards); Ms. 10. 11, 17; क्षत्रिया मागधं वैश्यात् Y. 1. 94; Mb. 13. 49. 10. -3 A bard or panegyrist in general; सूतमागधबन्दिनः Bhāg. 1. 11. 20; परिणतिमिति रात्रेर्मागधा माधवाय Śi. 11. 1. -धाः (pl.) N. of a people, the Magadhas. -धा 1 A princess of the Magadhas. -2 Long pepper. -धी 1 A princess of the Magadhas; तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी R. 1. 57. -2 The language of the Magadhas, one of the four principal kinds of Prākrita. -3 Long pepper. -4 White cumin. -5 Refined sugar. -6 A kind of jasmine. -7 A variety of cardamoms. -8 The daughter of a Kṣatriya mother and a Vaiśya father. -9 Anise. -10 N. of a river (शोणा). -11 A kind of रीति in rhetorics. The अलङ्कारशेखर (7) gives the following illustration :- पाणौ पद्मधिया मधूककुसुमभ्रान्त्या पुनर्गण्डयोर्नीलेन्दीवरशङ्कया नयनयोर्बन्धूकबुद्ध्याधरे । लीयन्ते कबरीषु बान्धवजनव्यामोहजातस्पृहा दुर्वारा मधुपाः कियन्ति तरुणि स्थानानि रक्षिष्यसि ॥

**मागधा, मागधिका** Long pepper.

**मागधिकः** A king of the Magadhas.

**माघः** [ मघानक्षत्रयुक्ता पौर्णमासी माघी साऽत्र मास अण् ] 1 N. of a lunar month (corresponding to January-February). -2 N. of a poet, the author of the Śiśupālavadha or Māgha-kāvya; (the poet describes his family in Śi. 20. 80-84 and thus concludes :— श्रीशब्दरम्यकृतसर्गसमाप्तिलक्ष्म लक्ष्मीपतेश्चरितकीर्तनचारु माघः । तस्यात्मजः सुकविकीर्तिदुराशयादः काव्यं व्यधत्त शिशुपालवधाभिधानम् ॥ ); उपमा कालिदासस्य भारवेरर्थगौरवम् । दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥; तावद्भा भारवेर्भाति यावन्माघस्य नोदयः Udb. -घी The day of full moon in the month of Māgha.

**माघमा** A female crab; कुत्रीं खादति मांसानि माघमां सेगवा इव Mb. 12. 139. 89.

**माघवत** a. (-ती f.) Belonging to Indra. -ती The east. -Comp. -चापम् the rainbow; (धत्ते) मेघस्य माघवतचापधरस्य लक्ष्मीम् U. 5. 11.

**माघवन** a. (-नी f.) Belonging to or ruled by Indra; ककुभं समस्कुरुत माघवनीम् Śi. 9. 25; अवनीतलमेव साधु मन्ये न वनी माघवनी विलासहेतुः Jag.

**माघोनम्, माघोनी** f. The east.

**माघ्यम्** The flower of the kunda creeper.

**माङ्क्ष्** 1 P. (माङ्क्षति) To wish or desire, long for.

**माङ्गलिक** a. (-की f.) [ मङ्गल-ठक् ] 1 Auspicious, tending to good fortune, indicative of auspiciousness; मुदमस्य माङ्गलिकतूर्यकृतां ध्वनयः प्रतेनुरनुवप्रमपाम् Ki. 6. 4.; Mv. 4. 35; Bv. 2. 57; कथमपि गुरुशोकान्मा रुदन् माङ्गलिक्यः (पुरतरुण्यः) Bk. 1. 26. -2 Fortunate.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**माङ्गल्य** *a.* [ मङ्गलाय हितं ष्यञ् ] Auspicious, indicative of good fortune; क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतम् Ś. 4. 4; सर्वमङ्गलमाङ्गल्ये शिवे Devīstuti. **-ल्यम्** 1 Auspiciousness, prosperity, welfare, good fortune. -2 A blessing or benediction. -3 A festivity, festival, any auspicious rite. -4 An auspicious thing, amulet. **-Comp.** **-मृदङ्गः** a drum beaten on auspicious occasions; ध्वनिश्च माङ्गल्यमृदङ्गमांसलम् U. 6. 25.

**माचः** A way, road.

**माचलः** 1 A thief, robber, burglar. -2 A crocodile. -3 N. of a disease; L. D. B. -4 Sickness.

**माचिका** A fly.

**माजलः** A kind of bird, the blue roller.

**माञ्जिष्ठ** *a.* (-ष्ठी *f.*) [ मञ्जिष्ठया रक्तम् अण् ] 1 Red as madder; नीललोहितमाञ्जिष्ठपद्मवर्णैः सितासितैः Rām. 5. 1. 5 ( com. माञ्जिष्ठः कृष्णपाण्डुर इति कतकः । पाटल इत्यन्ये । ) -2 Dyed with madder; माञ्जिष्ठेषु व्यजयते न स्म सैन्यैः Śi. 18. 34. **-ष्ठम्** Red colour.

**माञ्जिष्ठिक** *a.* (-की *f.*) Dyed or tinged with madder; मौर्व्या मेखलया नियन्त्रितमधोवासश्च माञ्जिष्ठिकम् U. 4. 20; Mv. 1. 18.

**माटङ्गः** A salt-market.

**माटिः, माठी** An armour, mail.

**माठः** A road.

**माठरः** 1 N. of Vyāsa. -2 A Brāhmaṇa. -3 A distiller ( शौण्डिक Sk. ) -4 One of the attendants on the sun ( पारिपार्श्विक ); तैरेव फलपत्रैश्च स माठरमतोषयत् Mb. 12. 292. 8. -5 N. of a Gotra; माठरोऽस्मि गोत्रेण.

**माडः** 1 A species of tree. -2 Weight, measure.

**माडवः** A particular mixed caste.

**माडिः** A palace.

**माडुकः, -ड्डिकः** A drummer.

**माढिः** *f.* 1 The young leaf before it opens. -2 Honouring. -3 Sadness, dejection. -4 Poverty. -5 Anger, passion. -6 The border or hem of a garment. -7 A double tooth ( also माढी ).

**माणवः** [ मनोरपत्यम् अण् अल्पार्थे णत्वम् ] 1 A lad, boy, youth, youngster. -2 A little man, manikin ( used contemptuously ). -3 A pearl-necklace of sixteen ( or twenty ) strings. -4 A young Brāhmaṇa. -5 N. of one of the 9 treasures.

**माणवकः** 1 A youth, boy, lad, youngster ( oft. used contemptuously ). -2 A little man, dwarf; manikin; मायामाणवकं हरिम् Bhāg. 8. 18. 24. -3 A silly fellow. -4 A scholar, religious student. -5 A pearl-necklace of sixteen ( or twenty or fortyeight ) strings; श्रीवादभुतैवावदुशोमितापि प्रसाधिता माणवकेन सेयम् N. 7. 66. **-कम्** A kind of metre.

**माणविका** A young girl, damsel.

**माणवीन** *a.* [ माणवस्येदं खञ् ] Boyish, childish.

**माणव्यम्** [ माणवानां समूहः यत् ] A company of lads or boys.

**माणिकः** A jeweller.

**माणिका** A particular weight ( equal to eight *palas* ).

**माणिक्यम्** A ruby; शैले शैले न माणिक्यम् Subhāṣ.

**माणिक्या** A small house-lizard.

**माणिबन्धम्, माणिमन्थम्** Rock-salt.

**माण्डप** *a.* Belonging to a temple.

**माण्डलिक** *a.* (-की *f.*) Relating to, or ruling a province. **-कः** 1 The ruler of a province. -2 A sovereign with an annual income between 3 to 10 lacs of rupees; सामन्तः स नृपः प्रोक्तो यावल्लक्षत्रयावधि । तदूर्ध्वं दशलक्षान्तो नृपो माण्डलिकः स्मृतः ॥ Śukra. 1. 183.

**मातङ्गः** [ मतङ्गस्य मुनेरयम् अण् ] 1 An elephant; मातङ्गाः किमु वल्गितैः K. P. 7; Śi. 1. 64. -2 A man of the lowest caste, a Chāṇḍāla. -3 A Kirāta, mountaineer or barbarian. -4 ( At the end of comp. ) Any thing the best of its kind; *e. g.* बलाहकमातङ्गः. **-ङ्गी** 1 N. of Pārvatī. -2 N. of Vasiṣṭha's wife. -3 N. of one of the ten Mahāvidyās. -4 A Chāṇḍāla lady; नताङ्गी मातङ्गी रुचिरगतिभङ्गी A. L. **-Comp.** **-कुमारी** a Chāṇḍāla girl. **-ज** *a.* elephantine. **-दिवाकरः** N. of a poet. **-नक्रः, -मकरः** a crocodile as large as an elephant; मातङ्गनक्रैः सहसोत्पतद्भिर्भिन्नान् द्विधा पश्य समुद्रफेनान् R. 13. 11. **-लीला** N. of a medical work.

**मातरिपुरुषः** 'One who can act like a man only against his mother', a poltroon, cowardly boaster.

**मातरिश्वन्** [ मातरि अन्तरीक्षे श्वयति वर्धते श्वि कनिन् डिच्च अलुक् स० Uṇ 1. 156 ] Wind; पुनरुषसि विविक्तैर्मातरिश्वावचूर्ण्य ज्वलयति मदनाग्निं मालतीनां रजोभिः Śi. 11. 17; Ki. 5. 36; मातरिश्वा वायुर्मातर्यन्तरिक्षे श्वसिति मातर्याशु अनिति वा Nir.

**मातलिः** N. of the charioteer of Indra. **-Comp.** **-सारथिः** an epithet of Indra.

**माता** A mother.

**मातापितृ** (*dual*) Mother and father, parents; मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् Ms. 9. 177.

**मातामहः** A maternal grandfather. **-हौ** ( dual ) The maternal grand-father and grand-mother. **-ही** The maternal grand-mother.

**मातिः** *f.* 1 Measure. -2 A thought, idea, conception. -3 Accurate knowledge or determination.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**मातुलः** [ मातुर्भ्राता मातृ-डुलच् ] 1 A maternal uncle; ( तत्रापश्यत् ) आचार्यान् मातुलान् भ्रातॄन् Bg. 1. 26; Ms. 2. 130; 5. 81. -2 The Dhattūra plant. -3 An epithet of the solar year. -4 A kind of rice. -5 A kind of snake. -Comp. -**अहिः** a kind of snake. -**पुत्रकः** 1 the son of a maternal uncle. -2 the fruit of the Dhattūra plant; उन्मादिनो मातुलपुत्रकस्य कथं सहामो बत कण्टकित्वम्.

**मातुलकः** 1 A maternal uncle ( as a term of endearment ). -2 The thorn-apple.

**मातुला, मातुलानी, मातुली** 1 The wife of a maternal uncle; Ms. 2. 131; Y. 3. 232; Bhāg. 1. 14. 27. -2 Hemp; जातीफलं मातुलानी महिफेनं च पत्रकम् Śiva B. 30. 15.

**मातुलेयः** ( -**यी** *f.* ) The son of a maternal uncle.

**मातुलिङ्गः, -मातुलुङ्गः** A kind of citron tree; ( भुवो ) भागाः प्रेङ्खितमातुलुङ्गवृतयः प्रेयो विधास्यन्ति वाम् Māl. 6. 19. -**गम्** The fruit of this tree, a citron.

**मातुल्यम्** The house of a maternal uncle; बाल एव तु मातुल्यं भरतो नायितस्त्वया Rām. 2. 8. 28.

